॥अथ च्याश्रयनाम महाकाव्ये सटीकं प्रारभ्यते ॥

॥ॐ अर्हं॥ ॐ नमः सर्वज्ञेभ्यः॥ अथ श्रीहेमचंद्राचार्यविरचितं द्याश्रयनामधेयं विंशतिसर्गात्मकं
निसर्गरमणीयं सटीकं महाकाव्यं प्रारभ्यते॥ श्रीः॥ श्रीभूर्भुवः स्वस्तितयाहिताग्निगेहे भितोयस्यविभा
स्वरस्य॥ भातस्फुलिंगाविवपुष्पवंतोतज्ज्योतिरेकंपरमंनमामः॥ यच्चक्रित्वाभिषेकेगगनसवनसन्मंडपे
स्नाननीरंस्वर्गगाग्रेशुभाघैःस्फुरतरुदलयुक्पूर्णकुंभामृगांकः॥ दृङ्स्त्रीक्षिप्तलाजाध्रुवमुडुनिकराजज्जुरे
कातपत्रंराज्यंजैनेश्वरोयंत्रिजगतिकुरुतांसार्वभौमप्रतापः॥ ज्ञानंरातुसरस्वती भगवतीसामेययाज्यो
तिषाविश्वोद्योतिसदोदितेनसवनेवासप्रतिज्ञांमिषन्॥ निर्जित्यद्विजनायकः किलमृगाभैर्लालयन्पालय
न्कंगस्यंसमयाकरोतिविजनेयानेवनेवासितः॥ श्रीपार्श्वनाथजिनदत्तगुरुप्रसादादारभ्यतेरससतोल्स
धियापिकिंचित्॥ श्रीहेमचंद्रकृतसंस्कृतदुर्गमार्गश्रीद्याश्रयस्यविवृतिस्वपरोपकृत्यै॥ छ॥ श्रीः॥
इहभक्तिप्राग्भाराद्महमिकानम्रकस्रश्रीकुमारपालभूपालप्रमुखासंख्यपृथ्वीपालचक्रवालभालस्थ
लीकृप्तस्फुरभिमृगनाभिपुंड्रकचूर्णप्रसक्तिप्रोल्लसितपादारविंदोदारनखरादर्शमोंदर्यालक्षणतर्कच्छंदः
साहित्यालंकारत्रिषष्टिशलाकापुरुषचरित्रयोगशास्त्रप्रमुखानेकशास्त्रनिर्माणोन्मुलितजगत्सृष्टिवि
शिष्टसृष्टिचातुर्यः कोविदवृंदवर्यः श्रीहेमचंद्राचार्यायद्यपिस्वोपज्ञश्रीसिद्धहेमचंद्राभिधानस्यसंस्कृत
शब्दानुशासनस्यनिःशेषशब्दव्युत्पादनवपुषःसूत्रनिश्चप्तसाध्यायांगस्यसकललितपदन्यासस्यप्रभूतप्र
श्नोत्तरप्रवृत्तिमदगंधोद्धुरस्यगजस्येवाल्पप्रमाणेग्रंथेसमुद्गकेइवनिबंधःकर्तुंइशकस्तथापिमंदमतय
एतद्वृहद्वृत्तावधीतायामपिभूरिसंज्ञाधिकारनियमविभाषापरिभाषोत्सर्गापवादादिविचारातिबाहुल्येने
तस्यामुक्तंप्रयोगजातंसम्यक्विवेक्तुंनशक्यत्यतस्तेषांसकलप्रयोगजातस्यसम्यग्विविक्तयेतथानेनश
ब्दानुशासनेनप्रधानोपाध्यायेनेवसर्वेपिशब्दाःशिष्याइवसम्यग्व्युत्पादिता अपियावन्महाकाव्येलोक
व्यवहारइवनव्यापारितास्तावत्त्वमत्यात्यक्काव्यवहारिकेअर्थेप्रयुज्यमानानाभीष्टार्थसिद्धिभाजोभवंती
तितेयस्मिन्नर्थेयथाप्रयुज्यंतेतथादिङ्मात्रेणदर्शनार्थंतथासंसिद्धशब्दसंदर्भपुष्पोत्करसंभृतादस्माद्या

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

करणात्पुष्पकरंडकादिवोद्दत्येतत्प्रयोगप्रसूनप्रकरः काव्यदाम्निगुंफितः सुमतिभिरपिसुखेनग्राह्योभवती
त्येतदर्थमेतच्छ ब्दानुशासनविशेषहेतुश्रीसिद्धचक्रवर्तिश्रीजयसिंहदेववंशातदानवर्णनायचद्याश्रयंश
ब्दानुशासनप्रयोगसंदर्भसंग्रहस्वरूपतयासर्वकाव्यलक्षणलक्षितप्रबंधस्वरूपतयाचयथार्थाभिधानंम
हाकाव्यंचिकीर्षतः शिष्टसमयपरिपालनायनिर्विघ्नंशास्त्रसमाप्तयेचेतस्यादौश्रीसिद्धहेमचंद्राभिधानश
ब्दानुशासननमस्कारानुसारेणाभीष्टदेवताप्रणिधानरूपंनमस्कारंचक्रुः॥ छ॥ श्रीः॥ अर्हमित्यक्षरं
ब्रह्मवाचकंपरमेष्ठिनः॥ सिद्धचक्रस्यसद्बीजंसर्वतःप्रणिदध्महे॥ छ॥ अर्हमितिवर्णसमुदायंसर्वतः
सर्वस्मिन्देशेकालेचप्रणिदध्महे॥ आत्मनोध्यायकंबीजमध्येनसंश्लेषणार्हंकारंध्येयंसर्वतोवेष्टितंचिंत
यामः यद्वाहंशब्दवाच्येनभगवताहंताध्येयेनाभिन्नमात्मानंध्यायामइत्यर्थः कीदृशंनिर्मुक्तात्मकत्वात्पर
मपदंसिद्धिलक्षणंतिष्ठतीतिपरमाक्किदित्योणादिकेकिंतीनिर्भीरुष्ठानादयइतिषत्वेगणपाठसामर्थ्यात्मप्त
म्याअलुपिपरमेष्ठीतस्यपरमेष्ठिनोभगवतोअर्हतोवाचकंप्रतिपादकमतएवाक्षरंब्रह्माभिधानाभिधेययोरभे
दोपचारादचलितगुणात्मकत्वादीनांपरस्परविरुद्धानामपिभीमगुणात्मकत्वंज्ञानंपरमज्ञानस्वरूपंपरमेष्ठि
वाचकमित्यर्थः यद्वा अक्षरमितिभिन्नंविशेषणंब्रह्मेतिचतत्तोक्षरंशाश्वतमेतदभिधेयस्यभगवतःपरमपद
प्राप्तत्वेनअविनश्वरत्वाद्ब्रह्मचपरमज्ञानस्वरूपं यद्वा अक्षरस्यमोक्षस्यहेतुत्वादक्षरंब्रह्मणोज्ञानस्यहेतुत्वा
च्चब्रह्मअतएवचसिद्धचक्रस्यसिद्धविद्यासिध्यादयस्तेषांचक्रमिवचक्रंयंत्रकविशेषस्तत्रसत्प्राधान्येनप्रधा
नंबीजंतत्वाक्षरंस्वर्णसिध्यादिमहासिद्धिहेतोःसिद्धचक्रस्यपंचबीजानिवर्तंतेऽधिदमाद्यक्षरमित्यर्थः एतेन
स्वर्णसिध्यादिमहासिद्धीनामिदंमूलहेतुरित्यक्तंभवतिएवचेदंध्यानार्हमित्यर्थः नन्वर्हमित्यस्ययोभिधेयः
सएवप्रणिधेयत्वेनमुख्योअर्हमितिशब्दस्त्वर्हत्वाद्गोणोगोणंचमुख्यानुयायीतिमुख्यस्यैवप्रणिधानंकर्तु
मुचितमेवंचार्हमित्यक्षरंब्रह्मवाच्यंश्रीपरमेष्ठिनंसिद्धचक्रादिबीजेनसर्वतःप्रणिदध्महे इतिकार्यंस्या
दत्रचैवमन्वयः सिद्धचक्रादिबीजेनार्हमित्यनेनवाच्यंपरमेष्ठिनंप्रणिदध्महेइतिनैवंयथाकश्चिदस्वस्था

मिनाप्रेषितंलिखितंसमायातस्वामिनीवांतरंबहुमानंप्रकटयन्स्वामिनिसातिशयांप्रीतिंप्रकाशयत्येवंप
रमेष्ठिनोवाचकमर्हमितिप्रणिदधत्श्रीहेमचंद्रसूरिर्मुख्येप्रणिधेयेअर्हमितिसातिशयंप्रणिधायंरव्या
पितवान्येनहियस्यनामापिध्यातंतेनसन्नितरांध्यातइतियथोक्तमेवसाधुतयासर्वपार्षदत्वादस्यकाम
स्यसर्वदर्शानुयायीनमस्कारोवाच्यइत्सर्हशब्देनपरमेष्ठिशब्देनचहरिहरब्रह्माणोपिव्याख्येयायथा
परमेष्ठिनोहरेर्हरस्यब्रह्मणश्चवाचकमर्हमितिप्रणिदध्महे अर्हमितिशब्दस्त्येतेत्रयोपिवाच्याः॥ यदु
क्तं॥ अकारेणोच्यतेविष्णूरेफेब्रह्माव्यवस्थितः॥ हकारेणहरःप्रोक्तस्तदंतेपरमंपदमिति॥ शेषंप्राग्वद्व्या
ख्येयं अर्हमित्यनेनशब्दानुशासनसूत्रादिस्थोर्हमितिनमस्कारःसूचितः अक्षरंब्रह्मेत्यादिनाचतद्व
त्तिःसूचिता॥ अथेतत्काव्यनायकवंशमाशीर्वादपूर्वंप्रशंसन्नाह॥१॥ छ॥ भीमकांतोद्धतोदात्तहिंस्र
शांतगुणात्मने॥ भद्रंश्चौलुक्यवंशायकृत्स्नस्याह्लादसिद्धये॥२॥ छ॥ चौलुक्यवंशायचुलुकेसंध्यावंद
नायविधात्रांबुनाभृतेहस्तेभवोदिगादिदेहांशाद्यइतियेचुलुक्यः॥ उक्तंच॥ अयोग्यामातंगाःपरिगलि
तपक्षाःक्षितिभृतोजडश्रीतिःकूर्मःफणिपतिरयंचद्विरसनः॥ इतिध्यातुर्धातुःक्षितिविधृतयेसांध्यचुलुको
त्सृष्टस्यौकश्चिद्विलसदसिरेवटःसकृभटः॥ चुलुक्यस्यादिक्षत्रियविशेषपुरुषस्यायंतस्येदमित्यणि
चौलुक्यःसचासौवंशश्चयद्वाचुलुकोत्पन्नपुरुषापत्यभेदाच्चुलुकस्तस्यापत्यंवृद्धंगर्गादित्वाद्यञि चौलुक्य
स्तस्यवंशःसंतानश्चौलुक्यवंशस्तस्मैभद्रंस्वस्त्यस्तित्याशीर्वादस्तद्भद्रायुष्येत्यादिनाचतुर्थीयत्रान्यक्रिया
पदंनश्रूयते तत्रास्तिर्भवतिपरःप्रयुज्यतेइत्यत्रभवतीत्यस्योपलक्षणत्वात्संध्यादिपरोपितेनात्रास्तितिज्ञे
यं आशीर्वाददानहेतुगर्भविशेषणमाह कृत्स्नस्याह्लादसिद्धयेइति॥ स्यादित्यसकृद्धातोर्यात्स्यत्ययांतस्य
प्रतिरूपकोविधिर्विचरणान्वितविवादानेकांतसंशयाद्यर्थवृत्तिरव्ययोत्रतुभीमकांतेतिविशेषणनानेकां
तस्यैवसाध्यत्वादनेकांतवृत्तिमृत्यातनस्यतत्पूर्वकावावादस्याह्लादोनित्यत्वाद्यनेकधर्मशबलैकवस्त्वभ्यु
पगमरूपः श्रीमदार्हतमतप्रधानप्रासादचूडावलंबिप्रलंबोद्दंडपांडुरपताकायमानोऽनेकांतवादःसि

द्विर्निष्पत्तिर्ज्ञापनंवाकृप्तानिर्मितास्याद्वादस्यसिद्धिर्येनतस्मैस्याद्वादसिद्धिविधानेपिहेतुविशेषणमाह
भीमकांतोद्भतोदात्तहिंस्रशांतगुणात्मनइतिभीमाःरौद्राःकांताःसोम्याःउद्भटाअविनयप्रधानाउदात्ता
विनयप्रधानाहिंस्राद्यातुकाःशांतादयाप्रधानायेगुणाधर्मास्तएवधर्मिणोरभेदविवक्षयावंशस्यभीमत्वा
दिधर्मैःसहैक्यादात्मास्वरूपंयस्यतस्मैअत्रचभीमगुणात्मकत्वंकांतगुणात्मकत्वादीनांपरस्परविरु
द्धानामपिविरोधोभागइवप्रत्यक्षप्रमाणमत्रदृष्टेष्टेनबाध्यमानाभ्रांत॥ यतउक्तं॥ दृशात्मान्नविरोधो
पिकथ्यतेयुक्तिशालिभिः॥ विरोधोनुपपन्नोहियुतोजैनमतेमतः॥ यदियेषामेकत्रदृश्यमानानामपि
विरोधउद्भाव्येततदेकस्मिन्नपिपुरुषेपुत्रत्वपितृत्वेस्थूलत्वकृशत्वेलघुत्वमहत्त्वेनघटेयातां अथैकोपि
पुमान्स्वजनकापेक्षयाजनकःस्थूलापेक्षयास्थूलोमहदपेक्षयालघुर्लघ्वपेक्षयाचमहानितिविषयभे
देनविरुद्धधर्माअप्येतेघटंतेतदत्रापिसमानं॥ तथाहि॥शत्रूनुद्दिश्यभीमगुणत्वंप्रजासुकांतगुणत्वं
दर्पिष्वद्भतगुणत्वंपूज्येषुउदात्तगुणत्वंव्यसनिषुहिंस्रगुणत्वंकृपापात्रेषुशांतत्वंचेतिएवंचप्रत्यक्षसिद्ध
भीमकांतगुणाद्यनेकधर्मात्मके अनुपमेचौलुक्यवंशेनदृष्टांतभूतेननित्यानित्याद्यनेकधर्मशबले
कवस्त्वभ्युपगमरूपस्याद्वादसिद्धिर्विज्ञानपूर्वकंदर्शनांतरीयाणांबौद्धसांख्यादिनामैकांता नित्यत्वैकां
तनित्यत्वादिवादेषुस्याद्वादस्येवन्याय्यत्वंसूचितं अतएवश्रीहेमचंद्रसूरेर्यतिमौलेराशीर्वादार्होयंवंश
इतिब्रुवतोहिधार्मिकंविनाअन्यस्यप्रशंसायादोषसंभवःस्याद्वादसिद्धयेइत्यनेनसिद्धिस्याद्वादादिति
सूत्रार्थःसूचितः॥ अथान्येभ्योधिकनयेनगुणेनायंवंशोत्रकाव्यवर्ण्यस्तंप्रकर्षयन्नाह ॥२॥ ७॥ ॥
लोकात्सालातुरीयादेःशब्दसिद्धिरिवानघा॥ चौलुक्यवंशाज्जयतिनयधर्मव्यवस्थितिः॥3॥ ७॥ चौ
लुक्यवंशाद्भम्ययपःकर्मधारइतिकर्मणिपंचमी चौलुक्यवंशंप्राप्यनयधर्मव्यवस्थितिर्नयोन्यायोध
र्मोअहिंसादिर्हेतयोर्व्यवस्थितिर्व्यवस्था सम्यक्प्रतिपाल्यमानतेननविद्यतेअघंदुःखंव्यसनंपापंवा

यस्याः साअनघाश्रेयसीसतीजयतिसर्वोत्कर्षेणवर्ततेयथासालातुरीयादेर्लोकात्सालातुरःअभिज्ञोनिवा
सोस्यसालातुरीयादियाणितीयणिसालातुरीयःपाणिनिरत्रत्यभृतिमादिपदादिंद्रचंद्रशाकटायनादिवैय्याक
रणानांश्रीसिद्धसेनमल्लवादिहरिभद्रभृतितार्किकाणांचपरिग्रहोलोकेवैय्याकरणसमयविदंप्रमाणविदंचप्रा
प्यशब्दसिद्धिःसाधुशब्दनिष्पत्तिरनघाअसाधुत्वदोषरहितासतिजयति अथवाअत्रश्लोकेइहेत्यध्याहार्य
सिद्धिव्यवस्थितापेक्षयाचगम्ययत्वंततोयमर्थः सालातुरीयादिलोकमाश्रित्ययथाशब्दसिद्धयःप्रयोगार्हाः
शब्दाःसिद्धाःसायथेहप्रबंधेजयति इयंहिकाव्यफलाकाव्येचात्रशब्दानुशासनक्रमानतिक्रमेणनिबध्यमानेषु
शब्देषुस्वफलाप्राप्त्यौत्कर्षवतीभवति तथाचौलुक्यवंशंप्राप्यया अनघानयधर्मव्यवस्थितिःसेहप्रारभ्यमा
णप्रबंधेआधारेजयतिइयंचानघत्वेनस्वयमेवोत्कृष्टाप्यस्मिन्काव्येनिबध्यमानोविशेषणोत्कृष्टोभवतीत्यर्थः।
भवतिहिविशिष्टाधारकृतोविशेषोयथाराजासर्वांगभूषितोपिरूपपात्रमपियदास्थानमंडपेसिंहासनमध्या
रोहतितदान्योकांचनशोभांलभतएवमत्रापीतिअत्रचव्याख्यानलोकात्सालातुरीयादेरित्यत्रशब्दसिद्धेःसा
मान्योक्तावपिश्रीहेमचंद्रसूरिकृतात्रकाव्येभिधेयत्वेनावाबाध्यस्थापत्यतयातत्क्रमानतिक्रमेणवात्र
सिद्धशब्दानुप्रयोगात् एतेनचास्यकाव्यस्यसोपज्ञशब्दानुशासनंसिद्धशब्देश्चौलुक्यवंशस्यनयध
र्मव्यवस्थित्याचसहाभिधानाभिधेयलक्षणःसंबंधउक्तःप्रयोजनंचसिद्धानांशब्दानांकाव्यविषयप्रयोग
ज्ञानंनयधर्मव्यवस्थितिज्ञानंचानंतरंपरंपरंचसिद्धशब्दप्रयोगज्ञानेअभीष्टदेवतादिस्तुत्यादिनालोकादि
तिसूत्रार्थः सूत्रक्रमेणनयधर्मव्यवस्थितिज्ञानेनचनयधर्मानुष्ठानादिक्रमेणनिःश्रेयसमुक्तं तथास्यद्
योराश्रयत्वाच्याश्रयइत्यन्वर्थेनामापिव्यंजितं लोकादित्यादिनालोकादितिसूत्रार्थःसूचितः॥ अथश्रीसि
द्धहेमचंद्राख्यशब्दानुशासनानुसारेणप्रयोगज्ञानंदर्शयन्नयत्रचौलुक्यवंशेनयधर्मव्यवस्थित्याराज्यम
पालयत्तत्पुरमाह॥ ७॥ अस्तिस्वस्तिकवद्भद्रंभागारंनयास्पदं॥ पुरंश्रियासदाश्लिष्टनाम्नाअणहिल
पाटकं॥ ४॥ श्रीः॥ नाम्नाअणहिलपाटकमणहिलपाटकाख्यंपुरंनगरमस्ति॥ कीदृशं धर्मोअहिंसादिर्ना

दिर्वा धर्मधर्मिणोरभेदोपचाराद्धर्मस्य धर्मवतामगारंगृहमतएवपूर्वपदभेदान्नयस्यन्यायवतामास्पदंस्था
नंयतएवधर्मागारंनयास्पदंचातएवचश्रियाधनधान्यद्विपदचतुष्पदादिमद्ध्यालक्ष्मीदेवतयावाश्लिष्टमा
श्रितमतएवचभूमेःसागरांबरायाःस्वस्तिकमिवयथास्वस्तिकनादोवेश्मवदिकालंक्रियतेतयायेनसर्वोपि
भूर्भूष्यतइत्यर्थःयच्चपुरंधर्मागारंधर्मस्यपूर्वोपार्जितसुकृतस्यअगारंनयस्यचास्पदंभवतितत्सदाश्रिया
लक्ष्म्याश्लिष्टंभवतिइत्सकिलेशःपूर्वंकिलवनराजगजननवपुरविधित्सयात्रधानभूमिपंडगवेषणार्थंवि
चरंतेकदाअरण्यमध्येगवादींश्चारयन्नणहिलोनामगोपालोदृष्टस्तदग्रेचचित्राभिप्रायोनिवेदितस्तेना
पितत्कार्यकरणार्थंशकुनगवेषणंकुर्वताएकत्रप्रदेशेगालोबलिष्ठकुक्कुरंनिर्वाटयन्दृष्टस्तत्रैवचाणहि
लेनवनराजराजस्यपुरंनिवेशःस्वनाम्नाकारितइतिलोकश्रुतिःआदिमध्यावसानमंगलानिदिशास्त्रा
ण्यायुष्मच्छ्रोतृकाणिमतिमच्छ्रोतृकाणिचभवंतीत्यर्हमितिषणिधानेनसर्वमंगलश्रेष्ठभावमंगलेविहि
तेपिलोकरूढिमनुसरन्नस्तिस्वस्तिकेतिशब्देनइव्यमंगलमपिन्यस्तवान्॥नाम्नेत्यत्रकरणेतृतीया॥
अथेतदेवपुरंधर्मार्थकामोपनिबद्धवर्णनाभिस्त्रिंशतशतेनश्लोकैर्वर्णयति॥धर्मअर्थकामवर्णनाय
थायथंस्वयमेवाभ्यूह्याः॥श्रीः॥ सपत्नीर्ष्याविधाहाभिःश्रीद्वेत्रानुपतीष्यते॥मधूत्तमंवधूदाभिःसभ्यू
क्षंमृदूरुभिः॥५॥ श्रीः॥ श्रियासर्वसमृध्याढ्यंभास्करंअत्रपुरंमृदूरुभिःकोमलसक्थीभिर्वधूदाभि
र्वध्वायोषितोयार्उदाःपाणिगृहीत्यस्ताभिरनुपतिभर्तृसमीपउत्तमंपत्न्यास्वयंदीयमानत्वेनप्रेमकंदलो
द्भेदकत्वान्मनोज्ञंमधुमद्यमिष्यते॥कथंसहभुवारुक्षंपणोपहासायचालनेनऽस्तियत्तत्सभ्यूक्षंपयआ
स्यादेवं॥यतःसपत्नीनांयाईर्ष्यापरसपत्नीचेतसोव्यापारोषस्तस्यविधिःकरणंतत्रहाअभिलाषोयासा
ताभिर्यथायथासपत्न्यःप्रियकृत्तयाविधप्रेमसंपत्तिंपश्यंत्योगादतरंर्ष्ययाग्लायंतितथातथावधूदाभ्यू
क्षंपणोपहास्यमधुपिबंतीत्यर्थः॥श्रीः॥ उमाभर्तृषभस्कंधामातापितृषिपूजकाः॥नृभर्तृऋषभाश्चास्मि
न्नासन्पितृणवर्जिताः॥६॥ श्रीः॥ नृभर्तृऋषभान्नृणांभर्तारःस्वामिनोनृभर्तारोराजानस्तेषुऋषभासु



ख्याराजाधिराजावनराजादयोअस्मिन्पुरेआसन्॥एतेनास्यचिरंतनतोक्तकीदृशाःउमाभर्तारंशुश्रूषयक्रम
मोबलीवर्दस्तत्स्कंधवत्स्थूलबलिष्ठाःस्कंधायेषांतेतथामातापितृषिपूजकाःमातावापितावामातापितरौतोवा
ऋषयश्चतेषांपूजकाअर्चकायाजकादित्यात्मसमासःएतेनविनयोक्तिःअतएवपितृणवर्जिताःपितृणासृणम
पत्याभावस्तेनवर्जिताःपुत्रवंतइत्यर्थःभवतिहिपूज्यपूजकानांपुत्रादिसमृद्धिः॥श्रीः॥होतृतंपोतृतंमातृऋ
तंपितृतमुद्गृणन्॥अत्रस्याज्जडजिह्वोपिवाग्मीविद्यामठंपठन्॥७॥श्रीः॥अत्रपुरेमठश्छात्राद्यान्योविद्या
येमठोविद्यामठोधर्माद्यर्थमुपाध्यायश्छात्राणांभोजनाच्छादनादिसामग्र्याउपनईश्वरैःकारितोवेश्मविशेषस्त
त्रजानावेकवचनंविद्यामठेत्यर्थःजडावर्णमात्रोच्चारणेप्यपट्वीजिह्वायस्यसजडजिह्वोपिउपाध्यायाध्यापन
नैपुण्येनहोतृन्पोतृन्मातृतृशब्दानुरुच्चार्यानपिउद्गृणन्नुच्चारयन्सन्वाग्मीपटुर्वाक्स्यात्॥जडजिह्वाहि
जिह्वापाटवायविषमवर्णानुच्चार्यते॥श्रीः॥अमुष्मिन्पुरुषार्थानांत्रिरूपत्वव्यवस्थितिः॥ऋकारस्यल्लृका
रेणसंधावविराजते॥८॥ श्रीः॥ अमुष्मिन्पुरेपुरुषार्थानांधर्मार्थकामानांत्रिरूपत्वव्यवस्थितिःत्रीणिरूपा
णिस्वरूपाणियेषांतेषांभावस्त्रिरूपत्वंतस्यव्यवस्थितिर्व्यवस्थाविराजतेपरस्परानाबाधयास्वस्वेवलायांप्र
वर्तनेनधर्मार्थकामानांत्रीणिरूपाणिव्यवस्थितानिशोभंतेइत्यर्थःयथाऋकारस्यल्लृकारेणसहसंधौत्रिरू
पत्वव्यवस्थितिःऌकारःऋ कारःऋकारइत्येवंरूपत्रयंव्यवस्थाराजते॥श्रीः॥गमल्लृतंपतल्लृतंशङ्कृत
ंलाक्षणिकाइव॥अत्राक्षरमपिप्राज्ञानवदंतिनिरर्थकं॥९॥श्रीः॥यथालाक्षणिकावैय्याकरणागमःप
तःशकश्चधातूनांसंबंधिनम्लृतम्लृकारमृङ्कार्यार्थत्वान्निरर्थकंनवदंतितथाअत्रपुरेप्राज्ञाःपंडिताःप्राज्ञ
त्वादक्षरमपिस्वरव्यंजनमात्रमपिनिरर्थकंनिष्प्रयोजनंनवदंति॥एतेनात्रत्यजनानामचापलत्वमुक्तं॥
श्रीः॥ अस्मिन्महऋषिस्कृत्यनृपाञ्छमहाऋषीन्॥दृष्ट्वेवलज्जिताजग्मुस्तेद्यांसमहर्षयः॥१०॥श्रीः॥
अस्मिन्पुरेनृपानपिअपिरत्रगम्यतेप्रचंडदोर्दंडोद्यानराजोपिशमेनकृत्वामहाऋषीन्महामुनितुल्यान्दृ
ष्ट्वालज्जिताइवतेअतिशमत्वेनप्रसिद्धाःसप्तमहर्षयोमरीच्यत्र्यंगिरःपुलस्त्यपुलहक्रतुवसिष्ठाख्यामहा
मुनयोद्यांव्योमजग्मुर्गताःयापियेनोत्तमेनगुणेनअत्रसमान्यःस्यात्सयहान्यस्मिन्नात्मनोतिहीनपितंगुणं

पश्यनिनदालोकोपहासेनलज्जितोदेशांतरंयाति॥ श्रीः॥ भांतिमत्तेभगामिन्योरंभास्तंभनिभोरवः॥ सर्वर्तुमंडितोद्यानेषुत्कारभ्रुवोंगनाः॥ ११॥ श्रीः॥ इहपुरेसर्वर्तुमंडितोद्यानेषुसंवैःषड्भिःऋतुभिरुपचाराड्डमंतशिशिरवसंतग्रीष्मशरद्वर्षाहेमंतषड्ऋतुजन्यपुष्पफलादिभिर्मंडितानिदेवताप्रभावादिनाभवतरणाद्भूषितानियान्युद्यानान्युपवनानितेषुमत्तेभगामिन्यः पुष्पफलाद्युच्चयनायमदोन्मत्तहस्तिवत्सविलासंविहरमाणाःमत्यःअंगनाभांतियतारंभास्तंभनिभोरवःकदलीकांडतुल्यमवश्यस्तंभयानागरलिपोवक्राकारत्वकारोलिरस्यनेतद्वद्वक्रभ्रुवोयासांतारूपवत्यइत्यर्थः अदंतास्वराइत्यादिभिःसूत्रैर्विधीयमानानांस्वरादिसंज्ञानांप्रयोजनंउवर्णादरस्वेस्वरेयवरलमित्यादिविधिसूत्रेषुवेतितद्उदाहरणदर्शनेनैवेताज्ञापिताभविष्यंतीतिस्वरादिसंज्ञासूत्राएफल्गुव्यविधिसूत्रोदाहरणानिदर्शितवान्॥ तथाहि॥ धर्मागारंनयास्पदंनाम्नाणाहिलसदाख्येअनुपनीष्यंतविधीहाभिःश्रीडेसपत्नीष्यामधूत्तमंमृडुरुभिःस्वभ्रूक्षेपंवधूदाभिःभर्तृषभगम्यकृत्यमित्यत्रसमान्यनांतेनदीर्घइतिदीर्घःबङ्कवचनंव्यास्यर्थंतेनोत्तरसूत्रेणऋलृतोरपिऋलृतिङ्स्वोभवतिऋल्कारःमातृऋतंअन्यथाऋस्तयोरितिपरत्वाद्रेवस्यादमहत्ऋषिभर्तृऋषभाः। मातृऋतंशङ्कुऋतमित्यत्रऋलृतिङ्स्वोवेतिवाङ्स्वःपक्षेमहर्षयःउमाभर्तृषभहोतृतंगस्तृतं॥ काश्चित्तुङ्स्वत्वाभावपक्षेप्रकृतिभावमपीच्छंतिनन्मतंमहान्तृपीन्ऋतान्ल्कारः॥ तृतापस्तृतमित्यत्रनृतदस्तृऋनृभ्योवेतिऋतोवारल्आदेशःपक्षेऋतासहपूर्वेणङ्स्वउक्तेणऋकारस्यऋकारःल्कारः॥ ऋताचसहदीर्घत्वंङ्स्वत्वंचगस्तृतंशङ्कुऋतंऋतापितृषिऋतापोस्तृतमित्यत्रऋतोवानोचेतिऋतऋलृआदेशःपक्षेऋतिभर्तृऋषभाःऋतिहोतृतंमातृऋतंतोचवापितृणांपितृतृ॥ पक्षेयथाप्राप्तऋकारः॥ होतृतमित्यत्रऋस्तृयोरितिऋलृतोस्यानेयथासंख्यमृतालृताचसहऋकारःमत्तेभदृष्टेवमंडितोद्यानेषुनिभोरवःसर्वर्तुमहर्षयःअत्रल्कारेत्यत्रावर्णस्येत्यादिनापदादयःअकारस्यईतऋतॄन्निमित्तकानिआकारस्यईतउतऊतऋतऋन्निमित्तकानिचउदाहरणानिस्वयंज्ञेयानि॥ एवमन्यत्रापिव्युत्क्रमोपन्यासकरणानियथायथंसुधियास्वयमभ्यूह्यानि॥ श्रीः॥ इहर्णार्णंकंबलार्णंवत्सरार्णंदशार्णकं॥ वसनार्णंवत्सतरार्णंप्रार्णंवानकस्यचित्॥ १२॥ श्रीः॥ इहपुरेऋणस्यावयवतयाऋणमृणार्णंकलांतरंकंबलस्यऋणंकंबलार्णंवत्सरस्यवर्षस्यऋणंवत्सरार्णंदशानांरूपकादीनांऋणंदशार्णंकुत्सितमल्पमज्ञातंवादशार्णंदशार्णकंवसनार्णंवस्त्रस्यऋणंवत्सतरार्णंतर्णकस्यऋणंप्रकृष्टमृणंप्रार्णंवानकस्यचिन्नास्तीतिप्रत्येकमभिसंबध्यात्वाशब्दःपूर्वोक्तऋणार्णाद्यपेक्षयाविकल्पार्थः एतेनात्रत्यश्लोकानामैश्वर्यातिशयोक्तिः॥ श्रीः॥ सरवेनाप्रऋणार्तश्चपरमर्तोरतोद्धया॥ अस्मिन्स्मरऋतःस्त्रीभिर्मुदर्तोरमतेजनः॥ १३॥ श्रीः॥ अस्मिन्पुरेजनस्त्रीभिःसहरमतेचःपूर्ववाक्यार्थापेक्षयासमुच्चयेकीदृक्सन्नप्रऋणार्तोनप्रकृष्टेनऋणेनऋतःपीडितईश्वरइत्यर्थःअतएवसरवेनअनुपमभाजनाच्छादनविलेपनादिजनितंसरवंप्राप्तःअतएवचमुदाप्रीत्याकर्त्र्याभर्यतेस्मऋतःप्राप्तोयथादत्तेनग्रामोगतःप्राप्तइत्यर्थः अतएवचस्मरऋतःकामेनपीडितःअतएवचरतीद्धयानिधुवनाभिलाषेणकर्त्रापरमर्तेःपरमप्रकृष्टंगादंयथास्यादेवमृतःपीडितः॥ प्रार्णंदशार्णंकंऋणार्णंवसनार्णंकंबलार्णंवत्सरार्णंवत्सतरार्णमित्यत्रऋणेप्रेत्यादिनाभारसामामानामितिवक्तव्यवचनस्यव्याख्यार्थत्वेनउक्तत्वादिह्रस्वत्वंचङ्स्वोपिभवतिप्रऋणऋणार्तइत्यत्रऋतेइत्यादिनाभाऋङ्स्वोपिभवतिस्मरऋतः॥ ऋतइतिकिसरवर्तःतृतीयाग्रहणंकिंपरमर्तेःसमासइतिकिमुदर्तः॥ श्रीः॥ इहर्षेतिपरार्षेतिसरवेप्रार्षेत्यहिसन्निधौ॥ प्रर्षयोत्रसतेजोभिरनपेतास्त्रयोमयेः॥ १४॥ श्रीः॥ अत्रपुरेवर्तमानाःप्रर्षयस्त्रयोध्यानादिविशेषणप्रकृष्टामुनयइहमर्त्यलोकेभवंभ्यादोऋषंतियांतितथासरवेऽर्ध्वलोकेपरार्षंतिप्रकर्षेणगछंतितथाऽहिसन्निभ

धोलोकेचप्रार्षंति ॥ यतस्त्वपोमयेस्त्वपांमिप्रकृतानिकारणतयायेषुतेस्त्वपोमयैः स्वतेजोभिःस्वकीयप्रभावेरनपेताः संयुक्ताः तपःप्रभावादत्रत्यमुनीनांत्रिभुवनमपिगृहांगणमित्यर्थः एवंप्रभावोपेतमहामुन्यवस्थित्याअस्यपुरस्यअतिपावित्र्यंसूचितं॥ प्रार्षंतिपरार्षंतीत्यत्रऋत्यारुपसर्गस्येत्यारउपसर्गस्यतिकिंइहर्षंतियंनधातुनायुक्ताःप्रादयस्तंप्रत्यपसर्गसंज्ञास्तेनेहनस्यात्॥ प्रऋषयः॥ श्रीः॥ प्रार्षयंतिशमेधर्मधुरायांप्रर्षभंतिच॥ अत्रप्रऋजवंत्येवदुर्जनेष्वपिसाधवः॥१५॥ श्रीः॥ अत्रपुरेसाधवःसज्जनाःशमेइंद्रियजयविषयेप्रार्षयंतिप्रकर्षेणऋषयइवाचरंतिकर्तुःकबितिक्विप्॥ तथाधुरायांधर्मकार्यप्राग्भारविषयेप्रऋषभंतिप्रकर्षेणऋषभाइवाचरंतियथाधवलाःशकटादिधुरंवहंत्येवंधर्मधुरामितिअतिधार्मिकाइत्यर्थःअतएवदुर्जनेष्वपिखलेष्वपिप्रऋजवंत्येवप्रकर्षेणऋजवइवाचरंतिहितमेवकुर्वंतीत्यर्थः॥ प्रार्षयंतिप्रऋषभंतीत्यत्रमाम्निवेतिवाआरकेचित्तुपक्षेऽङ्गस्वत्वमपीच्छंतिप्रऋजवंति॥ श्रीः॥ प्राल्कारायितभ्रुवः॥ प्रल्कारयंतिस्मदंतज्योत्स्नयात्रमृगीदृशः॥१६॥ श्रीः॥ अत्रपुरेप्राल्कारायिताप्रकर्षेणल्कारवदाचरितवत्यःकुटिलाइत्यर्थः वेण्यःकबर्योयासांताएवंप्रल्कारायितभ्रुवोमृगीदृशोदंतज्योत्स्नयादंतकांत्याकृत्वारवेव्योम्निप्रल्कारयंतिप्रकर्षेणल्कारानुकुर्वंतिदंतानामतिनैर्मल्यान्मृगीदृशान्दंतकांतयइवकाराव्योम्निस्फुरंतीत्यर्थःदंतकांतिज्योत्स्नयोर्नैर्मल्यादिगुणैःसादृश्याद्दंतकांतिर्ज्योत्स्नात्वेनव्यपदिश्यतेअनोज्योत्स्नाशब्दस्यचंद्रिकावाचकस्याप्यत्रप्रयोगोनदुष्यति॥ प्राल्कारायितप्रल्कारयंतीत्यत्रकृत्याल्युटोबहुलमित्यत्रापिपक्षेऽङ्गस्वत्वमित्येके॥ प्रल्कारायित॥ श्रीः॥ उपस्थितेप्रभोःकार्यगुणोघेर्धौतहृत्रयः॥ प्रेषप्रोदाइहप्रेष्याःप्रोहप्रोदिंनकुर्वते॥१७॥ श्रीः॥ अत्रपुरेप्रभोःस्वामिनःकार्येउपस्थितेउपागतेसतिप्रेष्याभृत्याःप्रोहप्रोदिंप्रोहेकथमिदंकरिष्यतेइत्येवंरूपेवितर्केप्रोदिंप्रागल्भ्यंनकुर्वंतेयतःप्रेषइदमेवकार्याभितिस्वामिनियोगेप्रोदाःसमर्थाःडुकरस्यापिस्वाम्यादेशस्यतत्क्षणादेवकारकाइत्यर्थःप्रेषप्रोदत्वमपि

कृतइत्याह गुणौघैःस्वामिभक्तिशक्तिस्थैर्यधैर्यादिभिर्धौतानिर्मलावृत्तिर्व्यापारायेषांते॥ गुणौघैरित्यत्रपेदात्संध्यक्षरेरितिणदोतो॥ धौतेत्यत्रउर्देतिअतुप्रेषप्रेष्याःप्रोदाःप्रोदिप्रोहेत्यत्रप्रस्यैषेत्यादिनाऐदौतो॥ श्रीः॥ सैरिस्मराक्षौहिणीनांसैरस्त्रीणामभावतः॥ इहैवधर्मःसाध्वत्रतात्रेतिवितर्क्यते॥१८॥ श्रीः॥ इहैवअणहिलपाटकेएवमान्यदेशेधर्मोस्तीतितथाअत्रपत्तनेअद्यवअद्यापिकलिकालेपिमःस्त्रीमहासतीत्वादिधर्मप्रधानत्वेनप्रसिद्धंस्त्रैताहितीययुगमस्तीतिचलोकैर्वितर्क्यतेइतिर्वाक्यसमाप्त्यर्थउभयत्रापियोज्यः कुतःअभावतोऽभावात्तासांसैरस्त्रीणांआत्मीयःस्वैराकृतईरतेआसांयद्वासेनात्मनानवुश्चभुराद्यनुज्ञयाईरंतिईरतेवाविचरंतिनाकृपात्येत्यादिनाकेसैराःयाःस्त्रियस्तासांकुलटानांकिंभूतानांस्वयमीरितशीलमस्यसैरीस्वतंत्रोयस्मरःकामस्तस्याक्षौहिण्यइवदुःसाध्यानांकामविपक्षाणांमुनीनामपिरूपलावण्यलीलाकटाक्षविक्षेपादिशस्त्रैःसाधकत्वात्सेनाविशेषाइवयाःयद्वासैरिण्यायाःस्मराक्षौहिण्यस्ताइवयास्तासां॥ स्वैरस्वैरिअक्षौहिणीनामित्यत्रस्वैरस्वैरित्यादिनाऐदौतोयदातुसैरिण्यश्चताःस्मराक्षौहिण्यश्चेतिसमासस्तदासैरिण्यइत्यत्रनामग्रहणलिंगविशिष्टस्यापिग्रहणमितिन्यायादत्रअद्येवेत्यत्रभनियोगालुगवेतिअस्यलुकनियोगेतुइहैवधर्मः॥ श्रीः॥ नोतुनेत्रानदृष्टौतुक्रूरानार्भौतुलंपदाः॥ नदीर्घोष्ठानङ्स्योष्ठानोष्ठस्थूलाइहस्त्रियः॥१९॥ श्रीः॥ सृगमोनवरं॥ नोतुनेत्राःमार्जारवत्कपिलरोद्राक्ष्यः॥ मार्जारोजाहकोमर्कोविडालोवृषदंशकः॥ मंडल्यारुभुगोतुश्चदीनानाथस्तुमूषिक इतिशब्दरत्नाकरः॥ नचदृष्टौतुवत्क्रूराशयानचबालोतुवद्लंपटास्तथास्थूलशब्दोत्रगुणमात्रवाचीउष्ट्र्योःस्थूलःस्थूलतयासाताउष्ट्रस्थूलानयाः॥ यद्वागुणिवचनःस्थूलशब्दोनउष्ट्र्याम्यांस्थूलोष्ठ्यइत्यर्थः॥ दीर्घोष्ठाःकृसोष्ठाःदृष्टौतुअभौतुइत्यत्रवोष्ठौतोसमासइतिवाअलुकसमासइतिकिंनोष्ठस्थूलाःनोतुनेत्राः॥ श्रीः॥ अत्रोपतिर्नःस्वैरान्प्रोखतिपरस्त्रियं॥ प्रेरितःश्रोत्रियोकारैर्धर्मश्चास्मिन्नुपेधते॥ २०॥ श्रीः॥ अत्रपुरेजनोलोकःस्वैरां स्वेनउद्दामात्मनापरिणीतामुपेतिउपगच्छतिसेवतेइत्यर्थःननुस्वदारांस्तावत्सेवतेपरदारानपिसेवितुमेवतेइत्याहपरास्त्रियंपरेणोढानारींनप्रोखतिधार्मिकत्वान्नगच्छतिअतएवास्मिन्पुरेधर्मश्चनकेवलमुक्तरीत्याकामःकिंत्वा

घपुमर्थोप्युपेधतेवर्धतेपरस्त्रीवर्जनंहिपरमंधर्मंहृदिनिबंधनंसर्वशास्त्रेषुगीयते॥ उत्प्रेक्षतेश्रोत्रियोंकारेःप्रेरित इतिश्रोत्रियाणांयष्टॄणांयागादिविधिकालेउच्चारणसंबंधिनोयेॐकाराःप्रणवास्तैःप्रेरित इवप्रेरितोवधर्मस्वर्थ स्वेतिदत्तानुमतिकइवेत्यर्थः अत्रलोकस्यपरदारवर्जकत्वेनधर्मःस्वयमेववर्धतेश्रोत्रियश्चयागादिविधौवेदमं त्रानुच्चारयद्भिःस्थानेस्थानेॐकाराउच्चार्यंतेतेषांचानुमंतरप्यर्थस्यदर्शनादेवमुत्प्रेक्षाअत्रोत्प्रेक्षासाक्षादनुक्ता पिवाक्यार्थसामर्थ्यादवसीयतइति। नचैवंविधेविषयेइवादिशब्दप्रयोगमंतरेणअसंबद्धतेवेतिशक्यंवक्तुंगमकत्वात्। अन्यत्रापितदप्रयोगेतदर्थावगतिदर्शनात्। यथामाघकाव्ये। त्रासाकुलःपरिपतन्परितोनिकेतान्युंभिर्नकैश्चिदपिधन्निभिरन्वबंधि॥ तस्योतथापिनमृगःक्वचिदंगनाभिराकर्णपूर्णनयनेषुहृतेक्षणश्रीः॥ परितःसर्वतोनिकेतान्यपिपतन्नाक्रामन्नकैश्चिदपिचापपाणिभिरसौमृगोअनुबद्धस्तथापिनक्वचित्स्थोत्रासचापलयोगात्स्वाभाविकादवतत्रचोत्प्रेक्षाध्वन्यंतेअंगनाभिराकर्णपूर्णैर्नयनेषुभिर्हृताईक्षणश्रीःसर्वस्वभूताअस्ययतोनतस्थोतत्तेनदप्यसंबद्धमस्फुटशब्दार्थन्यवहारेहिप्रसिद्धिरेवप्रमाणंएवमन्यत्रापिज्ञेयं॥ श्रोत्रियोंकारैःस्वोदामित्यत्रउमादिःतिअलुक्आडिदीर्घात्तेनैवमिद्धेलुग्विधानमन्यर्थकंस्यादित्याडादेशोगृह्यतेततेनआकुटाउदाततस्तेनसमासःप्रेरितःप्रोखवतीत्यत्रउपसर्गस्येत्यादिनाअलुक्॥ अनिणोधितिकिं। उपेतिउपेधते॥ श्रीः॥ अत्रगुर्वर्थपित्वर्थनतिलाकृतिभिर्जनेः॥ प्रोज्जायतप्रोषधयन्धर्मःप्रकल्पकैतिः॥ २१॥ श्रीः॥ अत्रपुरेधर्मःप्रोज्जायतप्रकर्षेणओजस्वीबलिष्ठइवाचरति केःकृत्वाजनेःकिंभूतैःसद्भिर्गुरुधर्माचार्योविद्याचार्योवातस्मैइयंगुर्वर्थापितरौमातापितरौताभ्यामियंपित्वर्थाद्धेतवेयेनतिप्रणामोताभ्यामेवनतुरोगादिनानृकारस्यवनृकारस्यवल्कृकारस्यववावक्राआकृतिःसंस्थानंयेषांतेविनीतैरित्यर्थः अतएवउपपन्नंयथास्यादेवमेकेइवमुख्याइवआचरंतिस्मकिंपिकेउपेकितास्तैःसर्वगुणमूलविनयवत्त्वेनप्रधानैरित्यर्थः यथाओजस्वीस्वोजसाशत्रूनपराभवतिस्वानुकूलान्स्वजनादींश्चपोषयतितथाधर्मोप्यत्रत्यजनविनयलक्षणेनमहाबलेनबलिष्ठत्वादहंकारादीन्स्वशत्रूनभिभवतिस्वानु

कूलानुदानशीलादींश्चपोषयतीत्यर्थः अतएवप्रेकनिप्रकर्षेणएकइवासाधारणइवाचरतिबलिष्ठत्वेननिःसपत्नत्वान्निरुपमोभवतीत्यर्थः उत्प्रेक्ष्यते प्रोषधयन्पूर्ववद्वृत्प्रेक्षात्रावसेयाप्रकर्षेणबलकांत्यादिवृद्धिकरीमोषधिंकुर्वन्निवणिग्वृकरोतिःसामान्यकरणार्थोपिप्रस्तावादिहविशेषेभक्षणकरणेवर्तते यद्वा अनेकार्थत्वाद्धातूनांकरोतिरिहभक्षणार्थस्तेनोषधिंभक्षयन्निवेत्यर्थः योहिबलकांत्यादिवृद्धिकरीमोषधिंभक्षयतिसतत्स्वभावादोजस्वीनिरुपमश्चस्यात्। अचिंत्योहिमणिमंत्रमहौषधीनांप्रभावः॥ श्रीः॥ रजतंचारुईक्षित्वाहरिअत्रचकांचनं॥ दधियेतन्मधुवेनतकुमारीएवमूहते॥ २२॥ श्रीः॥ रूगमोनवरं। हारिजात्याअवरम्यंएतत्स्त्यक्षवस्तुदधिवर्तते एवंतथैवेतत्स्त्यक्षंवस्तुमधुवर्ततेएवंचबालिकाविवर्कयतिसावर्ण्याद्धान्याच्चैवमोहएवमितिभिन्नक्रमेयथास्थानंयोजितएवएवंशब्देनैवकर्मणउक्तत्वादधियेतदित्यत्रचनामार्थमात्रेप्रथमैव॥ श्रीः॥ रोदस्यो पावयंत्येनोलवन्योर्वाग्निनायिनी॥ श्रव्येतिवृत्ताब्रात्यत्रगव्यनाव्यजलानदी॥ २३॥ श्रीः॥ अत्रपुरेब्रात्स्त्रीब्रत्रणोपत्यंनदीसरस्वत्यस्तिकीदृशीब्रत्रणःपुत्रीत्वेनमहातीर्थत्वादेनःपापंह्रियतेनयत्येनोलवनी अतएवरोदस्योद्यावापृथिव्यो पावयंतीपवित्रयंतीतथोर्वाग्निंवडवानलंसमुद्रमवश्यंनीतवती। णिन्नावश्यकाधमर्ण्येइतिणिनिः।ऊर्वाग्निनायिनीसकलंजगद्भक्षयिष्यामीतिवदंतंवडवाग्निंब्रत्सादिष्टासरस्वतीसमुद्रेप्रक्षिप्तवतीतिपुराणं अतएवश्रव्यंश्रवणार्हमितिवृत्तंचरित्रंयस्याःसातथा गव्यंस्वादुशीतलंस्वभावपरिणामत्वादिनागोभ्योहितंनाव्यंचागाधत्वान्नावातार्यंचजलंयस्यांसा। एतेनास्यपुरस्यअतिपावित्र्यंनिर्दोषजलंश्राचुर्यंचोक्तं॥ श्रीः॥ नगव्यत्यत्रगोयानोनोयानोनचनाव्यति॥ उपोयमानःआव्याभिर्लोयमानीस्रुगीतिभिः॥ २४॥ श्रीः॥ अत्रपुरेगव्यानोवृषवाहनोनरोनगव्यतिनगामिच्छतितथानोयानश्चप्रवहणवाहनःपुमान्नाव्यतिननावमिच्छतियतःआप्याभिर्मधुरतयावश्यंश्रवणार्हाभिःलोयमानीस्रुगीतिभिःश्रूयतेकूचश्रेण्यांश्रूयमानादेवलोमादेर्गिकादिस्तस्यापत्यंस्त्रियांअतइत्रलोयमान्योगायंत्यो। यद्वाश्रूयंतेश्रूयमानाःकेदारास्तेषामियंरक्षित्र्यस्तस्येदमित्यणिलोयमान्या

गोप्यस्तासांसकृगीतयःशोभनगानानिताभिरुपोयमानोव्याप्यमानआवर्ज्यमानइत्यर्थःएवंनामसकृगीतीनां माधुर्यादिगुणैर्हृदयेपरमप्रमोदवानितियावत्। स्वस्ययानहेतुत्वेनअत्यभीष्टमपिगवादिकंयानंचोराद्यैरपक्रि यमाणमपिगोयानादयःसकृगीतिश्रवणभंगभयेनअवहेलयंतीत्यर्थः।प्रेकृतिउपेकितेःशोजायतेघोषधयन्नित्यु त्रवानाम्नीत्यस्यलुग्वाप्रेकस्यपेकितेःगुर्वर्थपित्वर्थलाक्रुतिभिरित्यत्रइवर्णादेरित्यादिनायवरल्याःकेचित्तुइवर्णा दिभ्यःपरान्यवरलानींलंतिदर्धियेतत मधुवेनत तन्मतसंग्रहार्थमिवर्णादेरितिपंचमीव्याख्येया॥हारिअत्रचा रुईक्षितेत्यत्रङ्खोपदोवेतिवाङ्खःपक्षेब्रात्यत्र। कश्चित्तुप्रकृतिभावमपीच्छतिकुमारीएवं। अपदइतिकिं रोदस्योपावयंतीओर्वाग्निनायिनीत्यत्रएदोतोयायित्ययायोलवनी॥ पावयंतीत्यत्रईदोवावित्यवावो॥गव्य तिनाव्यतिश्रव्यआव्याभिःगव्यनाव्येत्यत्रय्यक्येइत्यवावोअक्यइतिकिंउपोयमानःक्ष्यमानीक्यवजनाद्यकारा दिःप्रत्ययोगृह्यंतेतेनेहभवतिनगायानःनोयानः॥श्रीः॥ पित्र्यपक्षेत्रवीक्षंतेगवाक्षस्थाःपुरंध्रयः॥गोक्षानंदि तृणांभूमिंगवाक्षानंदिनींनदीं॥२५॥श्रीः॥ अत्रपुरेपितृषुसाधुःपित्र्यस्तस्मिन्पित्र्यपक्षेश्राद्धपक्षेगवाक्षस्थाः वातायनस्थिताःपुरंध्रयोविलासिन्योभूमिंवीक्षंतेविशेषेणपश्यंतियतोगवांधेनूनांवृषभाणांचअक्षाणिइंद्रि याणितेषांतृप्तिहेतुत्वादानंदीनिआह्लादनशीलानितृणानिहरितानियस्यांतांतथानदींसरस्वतींचवीक्षंतेयतो गवाक्षानंदिनितृणाच्छुच्छेदकत्वाद्गवेंद्रियाणामाह्लादयित्रींशरदिहिभूमेर्हरितामिरामत्वेननदीचस्वच्छजल पूर्णत्वेनविशेषेणदर्शनीयास्यात्। एतेनात्रमहर्धिकातिसुखिताविलासिन्यःसंतीत्यर्थः॥श्रीः॥ गवोद्रिभि र्गवेंद्रांसेर्गवुष्ट्रप्रियवीरुधः॥गोअग्रस्थायिभिश्चास्यनिषेव्यंतेबहिर्भुवः॥२६॥श्रीः॥ अस्यपुरस्यबहिर्भुवोबा ह्यभूमयोगावश्चाद्रयश्चगवोद्रुमरुग्येषांतेर्गवाद्रिभिर्गोपालोद्रुपालैःगवोद्रुमस्यचारणायनिषेव्यंतेकिंभूतेर्गवा मिंद्रोगवेंद्रःषंडस्तदंसवदंसोस्कंधोयेषांतेर्गोदुग्धोद्गीदुग्धपानेनआवलिस्कंधैरित्यर्थः तथागोवृषस्याग्रमग्र भागःककुत्प्रदेशस्तत्रतिष्ठंतीत्येवंशीलायतेर्गोअग्रस्थायिभिश्च वीवधाहरणायचसेव्यंतेयतःकीदृशोगवुष्ट्र

स्यवृषकरभव्रजस्यउपलक्षणदश्वादेश्चप्रियावीरुधोलतायास्कृताःपत्तनगोचरेहिवृषभोष्ट्रादिप्रियचारिसंकीर्ण महद्वनमस्ति॥पित्र्यइत्यत्रऋतोरस्तद्धितइतिरादेशःपक्षेअत्रगोअक्षेत्यत्रपदोनइत्यादिनाअस्यलुक्गवाक्षेत्यत्र गोनार्म्नीत्यादिनावादेशःनार्म्नीतिकिंगोअक्षःकश्चित्तुसंज्ञायामपिगवाक्षेनीलंतिगवाद्रिभिःगवुष्ट्रेत्यत्रस्वरेवान क्षइतिवाअवादेशःअनक्षइतिकिंगोअक्षगवेंद्रेत्यत्रइंद्रेइत्यचःगोअग्रेत्यत्रवानसंधिरितिवाअसंधिःपक्षेगोअ क्ष॥श्रीः॥ व्रजाऽआस्ते ऽतिमावास्य ऽइतिस्वाधीनभर्तृकाः॥इदंब्रूहि ऽइदंमावाब्रूहीत्याकूरिहप्रियं॥२७॥श्रीः॥ स्वगमानवरं। व्रजाइत्यत्र इदंब्रूहीत्यत्रचवाक्येपरिसमाप्यर्थइतिशब्दोयोज्यःतथास्वाधीनरतगुणोत्कृष्टत्वेन आयत्तोभर्तायासांताःस्वाधीनभर्तृकाःक्षियासिप्रेषइतियोसर्वत्रप्लुतःव्रज ३ आस्तेसत्रप्लुतेअनितावितिसंधिः अनितावितिकिंआस्तेतिअत्रप्लुतस्यसंधिःकेचिल्लितिशब्देविकल्पमिच्छंतिआस्तेतिब्रूहि ३ इदमित्यत्रइ ३ वेतिवा असंधिःपक्षेब्रूहीत्यत्रापिप्लुतस्यसंधिः॥श्रीः॥ मणीइवजपावर्णकुरुकमेहारिणीअपि॥अहो ३ किंस्वि ३ दमू ३ अग्नी ३ इत्येतेअर्भकैरिति॥२८॥श्रीः॥ मणयोहिसामान्येनकांतिमंतोरक्तास्त्रवर्ण्यंतेइतिकांतिमत्तार क्तताव्यतयामनोहरेअपिअर्भकैर्बालैरुह्येतेत्यज्येतेननुबालकारम्यवस्तुकोतुकाद्बालस्वभावात्त्यक्तदृग् ह्यंतितत्किमितिहारिणीअपितेत्यज्येतेइत्याह अहो ३ किंस्वि ३ दमू ३ अग्नी ३ इतिअमूजपावर्णकुरुकमेकिम ग्नीवङ्किकणावितिबुध्वा अहोइतिकिंस्विदिच निपातद्वयंवितर्कातिशयद्योतनायवितर्कस्यचअंतरात्म प्रश्नरूपत्वात्स्वश्चेचप्रतिपदमितिप्लुतःसावर्ण्याद्बाल्याच्चाग्निकणभ्रांतिः॥श्रीः॥ मणीवमसृणोचक्रदंपतीव युतौस्तनौ॥विजेतुंरोदसीवात्रस्त्रीणांभातःस्मरायुधे॥२९॥श्रीः॥ अत्रपुरेस्त्रीणांभातःस्तनौ॥कीदृशौम णीवरत्नेइवमसृणोकठिनकोमलौतथाचक्रदंपतीवजायाचपतिश्चदंपतीचक्रश्चचक्रीचचक्रोचतोदंपतीव चक्रदंपतीचक्रवाकमिथुनंतोयथाग्रेमातिरेकादन्योन्ययुतौभवतस्तथायुनाविति स्थूलत्वादन्योन्यंमिलितौ उत्प्रेक्षतेरोदसीद्यावापृथिव्यौजेतुंपराभवितुंस्मरायुधेइवकामशस्त्रद्वयमिवरोदस्योरपिहृद्यौजृंभनम्यत्वात् ॥हारिणीअपिअमू ३ अग्नी ३ भातइहेत्यत्रईदूदेद्विवचनमित्यसंधिःएषाप्लुतानामितावपिसंधिर्नस्यात्।अ

ग्नी३इनिकेचित्तुमणीवाङ्स्यलंबेनेप्रियोवत्सतरोमगेतिप्रयोगदर्शनान्मणीइवमणीवेत्यादावसंधिप्रतिषेधंवर्णयंतितदयुक्तंवाशब्देनउपमार्थेनसिद्धत्वात्। अन्येतुयथादर्शनंसंधिमसंधिंचेछंतिमणीवदंपतीवरोदसीवमणीइव॥ श्रीः॥ अमीअमुमुंचोस्यनखाःकेइईक्षिताः॥ अपेहित्वमुउन्निद्रयद्याएवन्नुमन्यसे॥ ॥३०॥ श्रीः॥ उउहस्वत्वमेअस्मिन्नूईईदृशिरतिःकथं॥ तद्भलमनेनेतिसखीमाहात्रमानिनी॥ ३१॥ श्रीः॥ अत्रपुरेकिलकाचिन्नायिकापत्योसपत्नीनखक्षतादिकंदृष्ट्वाअत्यंतरुष्टापादपातादिकंप्रसादनक्रियांकुर्वाणेपिमानिनीत्वाद्यदाकथमपिनप्रसीदतितदात्सखीपार्श्वात्सतांप्रसादयति॥ तांचसखीमनुनयार्थंपत्यपराधंनिगूहयंतींमानिनीस्त्रीआह॥ अइतिसंबोधनहेसखिएहिमद्वचःश्रवणायमत्पार्श्वंमागच्छइइतिसंबोधनेहेसखिअमुंचिरप्रकृष्टवर्तिनिसपत्नीमंचनिगछतियस्तस्यअमुमुञ्चोस्यप्रियस्यकंठेअमीप्रत्यक्षवर्तिनोनखास्त्वयाईक्षितादृष्टाःएवंतयाप्रत्यक्षमपराधेदर्शितेपियावद्यापिसखीकिंचिन्नप्रतिवदतितावन्मानिनीमङ्गीकरोतीतिकोपाविष्टाह॥ उउन्निद्रयद्याएवंनुमन्यसेइतिउइतिसंबोधनेआनिरनुबंधःपूर्ववाक्यार्थवैपरीत्येवर्ततेपूर्वंयत्वयापत्यपराङ्मुखीनंतद्यदीदानीमेवंनुमन्यसेनुनिश्चितमन्यथामन्यसेतदाहेसखिउन्निद्रमत्पार्श्वाङ्गछपूर्वंमनितस्यार्थस्यकेनापिदुर्व्यलीकादिनाहेतुनाअन्यथाभाषिष्यात्वयापिनप्रयोजनमित्यर्थः एवंपरुषोक्तासखीमारुषदितिविचिंत्यपुनस्तांसामान्याह॥ ऊऊहस्वत्यादिऊइत्यक्षमायांपतिमक्षाम्यंतीप्राह॥ एइतिसंबोधनेहेसखित्वमूहस्वत्वमेवस्वचेतसिपर्यालोचयईइतिखेदेखिद्येहमीदृशिव्यक्तमत्यंतमपराङ्मुखिअस्मिन्पत्यौविषयेकथंरतिःप्रीतिस्यान्नकथमपीत्यर्थःऊइतिसंबोधनहेसखितत्स्माद्धेतोरनेनपत्याअलंकृतमित्यर्थः॥ श्रीः॥ नजानूअरुजलंकांभ्रमतोयस्यमारुतेः॥ अहोआंतंजिगमिषोरुजेत्तस्यापिजान्विह॥ ३२॥ श्रीः॥ जानूइत्यत्रजानुउइतिछेदःउलोकसंबोधनहेलोकाःयस्यमारुतेर्हनूमतोलंकारावणपुरींभ्रमतोदहनायपर्यटतःसतोजानुअर्धावतूनअरुजतूनश्रांतंअहोइत्याश्चर्येजान्विहेत्यत्रजानुउइहेतिछेदःउइतिसंबोधनहेलोकाआश्चर्येतस्यापिमारुतेरपिइहपुरेआंतादंतंमर्यादीकृत्यअभिव्याप्यवाश्रीविशेषविलोकनायजिगमिषोर्गंतुमिछोःसतोजानुरुजेत्खिद्येत्संभावनेससमीइदमहंसंभावयामीत्यर्थःएतेनास्यलंकासकाशादपिमहत्त्वोक्तिः॥ आंतमित्यत्रक्रियाविशेषणेद्वितीयाअमीअमुमुंचेत्यत्रादोमुमीइत्यसंधिःअएहिआएवंनुमन्यसइईक्षिताइईदृशीउउन्निद्रउउहस्वएअस्मिन्नूईअलमित्यत्रवादिःस्वरोनादित्यसंधिःस्वरेपरइतिप्रत्यासत्तस्त्रन्निमित्तकसंधिप्रतिषेधादिहदीर्घत्वलक्षणःसंधिर्भवत्येवजानुअरुजत्वंकेचित्तुचाद्येवादिस्थानस्याचादिरूपत्वात्स्वरनिमित्तकमपिसंधिमिछंतिजान्विहअनादिःतिकिंआंतंअहोआंतमित्यत्रउदंतइत्यसंधिः॥ श्रीः॥ उइत्यूंइतिवितिवाहोइत्याङ्गयकेगुरो॥ विभोइतिप्रभवितिचाहात्रविनर्याजनः॥ ३३॥ श्रीः॥ सुगमोनवरं। उइतिसंबोधनेआगछेत्यादिकाचक्रियासर्वत्राध्याहार्यासंबोध्यानांचबहुत्वाद्बहूनिसंबोधनपदानितथाविभोइतिप्रभवितीत्येतयोःप्रत्यक्षनरवाक्ययोरादिशेत्यादिक्रियाअध्याहार्याउपलक्षणत्वाद्भगवन्नित्यादीन्यपिगुरुसंबोधनपदानिज्ञेयानिप्रत्यक्षनरदायकानामनेकत्वात्॥ इतिसर्वत्रवाक्यपरिसमाप्तौ॥ विभोइतिप्रभवितीत्यत्रसौनवेतावितिवासंधिःउइत्यत्रउच्चोन्नितिवाअसंधिःअसंधिपक्षेचउन्नउइत्येवंरूपोदीर्घोअनुनासिकोवाउंइतिपक्षेसंधिःविते॥ श्रीः॥ किमुअंबाकिमुतातःकिम्वीशोगीरुइत्यभूत्॥ गुरुंप्रतिनृणामत्रवृद्धोघत्रुअलंयथा॥ ३४॥ श्रीः॥ अत्रपुरेगुरुंधर्माचार्यंवाप्रतिलक्षीकृत्यएवंविधानृणांगीर्वाणीवृद्धोधनसंतत्यादिवृद्धिनिमित्तमलंसमर्थाभवतिहिवृद्धिःपूज्येषुपूजोपचारवचनादिना॥ कागीरित्याहउहेगुरोवात्सल्यपरमोपकारित्वादिनात्वमस्माकंकिमुअंबाकिमुकिंवातातःकिमुईशःकिंवास्वामीइतित्रयाउहेलोकाःघत्रुप्रत्ययोआनुबंधत्वात्वृद्धोएकारोकारलक्षणायांसमर्थोभवतिशब्दसाम्येनोपमाकिमूशब्दाउनिपातयुताःसर्वेपिवितर्कस्यवाचकाः॥ किम्वीशइत्यत्रअञ्चगतीत्यादिनावकारोवासचासनूअसत्वादनुस्वारानुनासिकाभावःपक्षेकिमुअंबा॥ वर्गादितिकिंगीरुइतिअत्रितिकिंघत्रुअलंस्वरइतिकिंकिमुतातः॥ श्रीः॥ सामँसामध्रुवंतावद्दधिंदधिमधुंमधु॥ श्रूयंतेस्मश्रुवामत्रनयावन्मधुरागिरः॥ ३५॥ श्रीः॥ सामवेददधिमधूनिहिअतिमधुरत्वादिप्रधानगुणा

पेतानिस्फः परमेतानितावदेवस्वेनस्वेनातिमाधुर्यादिप्रधानगुणेनोपेतानियावदत्रपुरेस्फञ्चवांगिरोनश्रूयंतेतास्फ
चातिमधुरतमत्वादिप्रधानतमगुणोपेतास्फश्रुतास्फमामादिनकिंचिदित्यर्थः अत्राद्याःसामादिशब्दाःसामवेदादि
वाचकाःद्वितीयास्फकनट्टुणवाचकाःतावद्यावतोःक्रियाविशेषणादितिकालाध्वनोर्ण्यासाविनिवाद्वितीया॥ श्रीः॥ अ
मूपाणीमृदूपद्मकिमुकिन्नुनरवाअमी॥ केसराणीतितर्क्यंतेजनैरस्मिन्मृगीदृशां॥ ३६॥ श्रीः॥ अस्मिन्पुरेजनैर्मृ
गीदृशांस्त्रीणांपाणीनरवाश्चतर्क्यंतेकथमित्याह॥ अमूप्रत्यक्षोमृदूकोमलौपाणीकिमुपद्मेनयाअमीपाणिस्था
नरवारक्तत्वाच्चकिंतुकेसराणिपद्मस्थानिकिंजल्कानीति॥ सामंसामदधिंदधिमधुंमधुइत्यत्रअइउवर्णस्येत्या
दिनावाअनुनासिकः॥ अंतइतिकिंगिरःमधुराःअनिदादीतिकिंपाणीअमूमृदूअमीकिमु॥ श्रीः॥ इतिद्वितीय
पादःसमर्थितः॥ श्रीः॥ एतन्न्यायानक्षमोस्तोतुंनचतुर्मुखषण्मुखौ॥ हेतुर्वृद्धेरतृणिहृच्छिदृच्छ्रयंतसूरिभिः॥
३७॥ श्रीः॥ आस्तांतावदेकमुखःकश्चिद्यावच्चतुर्मुखषण्मुखावपिअपिरत्राध्याहार्यः अत्यस्कंदावपिएतन्न्यायानक्ष
म्यपुरस्यनीतीःस्तोतुमेतावंतईदृशाश्चात्रन्यायाइतिवर्णयितुंनक्षमोनसमर्थोएतेनात्रत्यन्यायानांश्रेष्ठतमत्वम
संग्रह्यत्वंचोक्तं अतएवएतत्पुरंसूरिभिस्तत्वातत्वविवेककुशलैर्वृद्धैर्धनधान्यद्विपदचतुष्पदादिसमृद्धिवर्धनस्यहेतुः
कारणंब्रूयेतकथ्येतवर्तमानार्थेपिकचित्समयीदृश्यते॥ भवतिहिन्यायवतिपुरेलोकश्रीयात्र। यद्वासूरिभिर्वास्त
विद्याकुशलैर्वास्तविद्यानुसारेणनिर्मितत्वाद्दृढैर्हेतुर्ब्रूयेत॥ वास्तविद्यानतिक्रमेणनिर्मितेहिपुरेश्रीर्विजृंभते॥
णिद्वृच्छिदृदितियथाणितृणानुबंधोणिगादिःत्रिनृत्रानुबंधोत्रिजादिश्चप्रत्ययोवृद्धैरादौदारलक्षणायाःहेतुः सू
रिभिर्वैयाकरणैःकथ्यते॥ श्रीः॥ अस्मिन्सागरुधूमेब्दशंकाभाङ्णशिखःशिखी॥ समुत्रचंचुरुद्गम्यस्फवाञ्ज
वतउन्मनाः॥ ३८॥ श्रीः॥ सदागरोधूमेनवर्ततेयत्रास्मिन्सागरुधूमेआस्मिन्पत्रेणवर्णाकाराशिखवाच्छडायस्य
सणशिखस्तथात्रकाराकाराचंचुर्यस्यसत्रचंचुःनागरलिपौहिणकारत्रकारावेवंलिख्येते यथा णत्र॥ शिखी
मयूरउद्गम्यग्रीवामूर्ध्वीकृत्यसुवाक्मधुरस्वरंयथास्यादेवंडयतेकेकायते॥ कीदृक्सन्अब्दशंकाभाक्मेघतर्क
वान्अतएवस्फुरत्तत्समागमाभिप्रायेणसमुत्सहर्षोअतएवचउन्मनाःउत्कंठितः एतेनेवंनामात्रागरुःप्रभूतोदेवगृ

CC-0. JANGAMWADI MATH COLLECTION. DIGITIZED BY eGangotri

हेषुविलासिभवनेषुचदंदह्यतेयावतातद्गोनसस्तत्रतेभ्यपटलविभ्रमंवहतिइस्फक्कंस्यात्॥ श्रीः॥ नयोहल्मात्र
झल्मात्राभिज्ञःसोपिक्षणाद्भवेत्॥ ज्ञातषण्णांदर्शनानामस्मिन्वाङ्मयसद्मनि॥ ३९॥ श्रीः॥ योनरोहल्मात्र
झल्मात्राभिज्ञहल्व्यंजनंहलेवहल्मात्रंझल्वधुट् झल्मात्रंमात्रशब्दोत्रस्वार्थएवहृदेतयोरभिज्ञोज्ञातानस्वा
घोव्यंजनधुट्सज्ञामपिनवेत्तीत्यर्थः सोप्यस्मिन्पुरेषण्णांषट्संख्यानांदर्शनानांजयिनोबाङ्मांरव्यवैशेषिकनैया
यिकजैमिनीयषण्मतसंबंधिनांतत्तत्वदेवताप्रमाणादिप्रकाशकशास्त्राणांक्षणात्झटितिज्ञाताभवेत्कयतः किं
भूतेऽस्मिन्वाङ्मयसद्मनिवाचांविकारः अवयवोवावाङ्मयंव्याकरणतर्कसिद्धांतस्यादित्यादिसर्वशास्त्राणित
च्चपुरुषविशेषपुस्तकादिचाधारंविनानावतिष्ठतेइत्यर्थाद्वाङ्मयस्यवाङ्मयवतांपुरुषविशेषपुस्तकादीनांस
र्वनिगृहेसर्वशास्त्रसामग्र्याउपेतेइत्यर्थः॥ स्फवाञ्ज्वतेर्णिहृच्छिदृसमुत्रचंचु अब्दशंकाभाङ्एतन्न्यायानउद्ग
म्यषण्मुखोउन्मनाइत्यत्रतृतीयस्यपंचमइतिवाअनुनासिकःतृतीयस्येतिकिंक्षणाद्भवेत्केचिन्नुव्यंजनस्य
स्थानेअनुनासिकेचानुनासिकमिछंतितस्यचस्फस्वाङ्मणोर्द्वइतिद्वित्वंचेछंतिननन्मतेहल्मात्रझल्मात्रवाङ्
मयषण्णामित्यत्रप्रत्ययेचेति नित्यमनुनासिकःपदांतइतिकिंसद्मनि॥ श्रीः॥ तावद्भिमांशुरानंदीतावद्भेमा
द्रिरुन्नतः॥ वाग्घ्रादिनोत्रनेक्ष्यंतेयावद्विघ्नघ्नितानराः॥ ४०॥ श्रीः॥ हिमांशुश्चंद्रस्तावदानंदीजगतामाह्लाद
यितानयाहेमाद्रिर्मेरुस्तावदुन्नतउच्चोयावदत्रपुरेनराः सज्जनानेक्ष्यंतेकिंभूताःवाग्घ्रादिनोवाचामत्यमितम
धुरयावाण्याह्लादिनःसकलपृथ्व्याआनंदनशीलास्तथाविघ्नघ्नितःविघ्नकुसमंततःसर्वैःप्रकारैःसर्वेषुचहिता
अनुकूलाः एतेनोन्नतमनस्कत्वंसूच्यतेउन्नताशयाहिविघ्नघ्नितःस्फःतुच्छाशयास्तुकदाचित्कार्यवशेनहिताःक
दाचिन्नंति॥ वाग्घ्रादिविघ्नघ्नितानामत्रसज्जनानादर्शनेस्फधांशुमेरूआनंदकोन्नतावपिनकिंचित्भासतेइ
त्यर्थः॥ श्रीः॥ यशःकृतककुभासेहिडितिषथितेर्नृपैः॥ ककुभास्तिबलैरत्रतुराषाड्द्रियमश्नुते॥ ४१॥ श्रीः॥
अत्रपुरेनृपैर्वेनराजादिभिःहेतुभिस्तुराषाडिंद्रोद्रियमश्नुतेलज्जामयतेकीदृशैःककुभास्तिबलैर्दिग्गजपराक
मैरतएवहिद्रुहतिप्रथितैःद्विषांशत्रूणांहत्याहननेनसर्वत्रविख्यातैरतएवचयशसाकीर्त्याकृतःककुभांदिशांहा

सोलक्षणायायोतायस्मैः अत्रस्यनृपान् मनुष्यानपिबलादिनास्वस्मादधिकान्दृष्ट्वाडंडालज्जनेइत्यर्थः॥ श्रीः॥
अनज्झल्यांधर्मार्थाभ्यांयुनोजनः निरीक्ष्यतेत्रनिष्पापंचेष्टयन्हितकाम्यया॥ ४२॥श्रीः॥ अत्रपु
रेसर्वत्रप्रसिद्धाजनोलोकोहितकाम्ययाऽहिकपारत्रिकश्रेयड्छया निष्पापंनिरवद्यंस्वकंचेष्टयन्व्यवहरन्ध
र्मार्थाभ्यांधर्मधनाभ्यांयुतोनिरीक्ष्यते॥ भवतोहिनिष्पाप्यापारिणांधर्मार्थावितिपाणिन्यादयाहिकचित्स्वर
व्यंजनयोस्वरहल्संज्ञांकुर्वंतियथाअनच्स्वररहितोहल्व्यंजनमझल्यांस्वरव्यंजनाभ्यांयुतोनिरीक्ष्यते॥ अस्वर
हिव्यंजनंपुरस्थिताभ्यांस्वरव्यंजनाभ्यांयुतंस्यात्॥ वाग्घूादिनःविश्वग्घिताःअनझल्यांहिडुतिनुराषाड्ढियं
तावद्धिमाशुःतावद्धिमाद्रिःककुभासेःककुभास्तीत्यत्रततोहश्चतुर्थइतिवाचतुर्थःतनडीनिकिंचेष्टयन्हित॥ श्रीः॥
वाक्कच्छरान्वीक्ष्यसोप्यस्मिन्वाक्पतिस्यादवाक्शिराः॥ राज्ञायशोभिस्तच्छ्वेतंयच्छ्वेतंनकदाप्यभूत्॥ ४३॥ श्रीः॥
अस्मिन्पुरेवाक्कूरान्वाचारूभटान्महावादिनोवीक्ष्यसवाक्पतित्वेनसर्वत्रप्रसिद्धोवाक्पतिरपिबृहस्पतिर
पिअवाक्छिराःलज्जयानीचैर्मूर्धास्यात्संभावनेअत्रसमभीअत्रस्यविद्वांवाक्पतेरप्यतिमात्रवाग्मित्वादिद
महंसंभावयामीत्यर्थः तथायद्रूक्कज्जलव्योमादिसदाकृष्णत्वेनकदापिश्वेतंशुभ्रंनाभूत्तत्तद्यत्रराज्ञावेन
राजादीनांयशोभिरतिवाङ्न्यात्श्वेतमभूत्॥ कविरूढ्याहियशःश्वेतंवर्ण्यते॥ श्रीः॥ षषड्च्छोषड्शांतिरू
तांवाकूश्च्योतनिरूधामिह॥ अबुछायिदंगानापृशायीपश्यन्छ्रियमिहागतां॥ ४४॥श्रीः॥ इहपुरशांतिरूतां
नगरादिक्षडोषड्व्यमार्याद्युपशांतिविधायिनांहिजानांवषड्श्रोषड्शब्दावव्ययेमंत्राक्षरेइंद्राद्रूतोवर्तनेशांति
कर्मार्याग्निकारिकादिविधानकालेवषड्श्रोषड्रूपावाकूवाणीरूधामिवश्च्योततिमार्याद्युपड्वोछंदकत्वेन
अत्याह्लादकत्वात्॥ एतेनास्यपुरस्यनिरूपड्व्यत्वमुक्तंतथाश्रियंलक्ष्मीदेवीमिहपुरआगतांपश्यन्सन्अ
प्रूजलेषुशेतेइत्येवंशीलोऽपृशायीसचासौदेवश्चअबुछायिदंवः श्रीपतिःसमुद्रशयनोपिनापृशायीनजलधि
जलशयनःसंभाव्यतेप्रस्तावादत्रसंभाव्यतइत्यध्याहार्यंश्रियोत्रागमनात्समुद्रतोहियोगनिद्रायाअभावात्

श्रीपतिरत्रागतइतिसंभाव्यतइत्यर्थः॥ वाक्कूरान्अवाकूशिरःतच्छ्वेतंयच्छ्वेतंबषड्श्रोषड्अपृशायी अबुछायीस्यत्र
प्रथमादित्यादिनावाछंदः॥ प्रथमादितिकिंपश्यञ्छ्रियंअधुदितिकिंवाकूश्च्योतति॥ श्रीः॥ अस्यांतकृतिभिः कल्पैः
खर्जेत्रैः फलदैः परं॥ धर्मःप्रीतःकलिःखिन्नःफलितःसन्मनोरथः॥ ४५॥ श्रीः॥ अस्यपुरस्यअंतर्मध्येकल्पैर्दानशीलत
पःस्वाध्यायादिभिर्धर्मक्रियाभिःकृत्वापरमतिशयेनधर्मःप्रीतःप्रहृष्टोविज्रंभितइत्यर्थः अतएवकलिःपापयुगंखिन्नः
संतप्तोतएवचसन्मनोरथःसतांसाधूनामनोरथोवांछाफलितःसिद्धःकिंभूतैःसद्भिःखर्जेत्रैःजेतारएवप्रज्ञाद्यणिजेत्रा
वशीकारिणःतैरतएवपुण्यहेतुत्वेनकृतंपुण्यमस्तिएषुतैःकृतिभिरतएवफलंस्वर्गापवर्गादिकंददतियेतैःफलदैः॥
कृतिभिःकल्पैःअंतःकृतिभिःफलदैःपरंखर्जेत्रैःफलदैरित्यत्ररःकरवेत्यादिनाःकःपोवापदेप्रीतःकलिःखिन्नःधर्मः
प्रीतःफलितः॥ श्रीः॥ स्वयंभूःश्रीपतिःशंभुःसूर्यःसोमःषडाननः॥ नृपैःषड्चक्रभृत्तुल्यैरस्यांतस्थापिताःस्फुराः॥ ४६॥
श्रीः॥ नृपैर्वनराजादिभिर्महाधार्मिकत्वादस्यपुरस्यअंतर्मध्येधर्मार्थंकारितनव्यप्रासादेषुस्वयंभूःभगवानर्हन्ब्रह्मात
श्रीपतिर्विष्णुःशंभुर्हरःसोमश्चंद्रःसूर्योरविःषडाननस्कंदः॥ कार्तिकेयशरजन्मवह्निभूस्कंदषण्मुखकलापिवाहनाः
॥ बाकुलेयगुहकुक्कुटध्वजस्वामिशक्तिधरतारकारयइतिशब्दरत्नाकरः॥ एतेस्फुराःदेवाःस्थापिताःकिंभूतैःषण्णाव
कभृतांमांधातृधुंधुमारहरिश्चंद्रपुरूरवोभरतकार्तवीर्यरघ्वादीनांसमाहारःषड्चक्रभृत्बलसेन्यादिनातेनतुल्यैः॥ स्व
यंभूःश्रीपतिःषडाननःशंभुःसूर्यःअंतस्थापिताइत्यत्रशषशेशषसंवेतिवाशषसाःपक्षेश्रीपतिःशंभुःनृपैःषड्सूर्यः
सोमः॥ श्रीः॥ निस्तंद्रैश्चंचलेश्छेकैष्टीकमानेष्टकारिभिः॥ तैस्तैष्टृरिहाश्वानांरसतिव्यथितेवभूः॥ ४७॥श्रीः॥
इहपुरेअश्वानांतैस्तैरनेकैरित्यर्थःष्टृैःसमूहैःकृत्वाभूरसतिशब्दायतेकीदृशैर्निस्तंद्रैर्निरालस्यैस्तेजस्विभिरि
त्यर्थः चंचलैर्जात्याहयसंभविनचपलैःछेकैःस्फुशिक्षितत्वेनगतिपंचककरणदक्षैरतएवटीकमानैर्बाल्यालिका
दोवल्गिभिरतएवचष्टकारावारखुरैःभूम्याहननेनष्टकारंभूपृष्ठंकुर्वंतीत्येवंशीलायतैःष्टकारिभिःउत्प्रेक्ष्यतेव्यथितेव
पीडितेवअन्योपिहिंस्यमानोवानरतिभुवश्चपीडासंभावनाश्वखुराघातात्॥ तैस्तैरित्यत्रवीप्सायांहिरुक्तिःवीप्सा
चात्रषड्गतबकुत्वगुणेनैव॥ निस्तंद्रैश्चंचलेश्छेकैष्टीकमानेष्टकारिभिःतैस्तैस्षड्रित्यत्रचष्टतेइत्यादिनाशषसाः
॥ श्रीः॥ गायंस्तारंवहंश्छायांव्रजंश्चारुवधूजनः॥ दृश्यतेस्मिष्टकोयूनांकुर्वंश्चलतममनः॥ ४८॥ श्रीः॥ अस्मिन्पुर

वधूजनोयूनामेवरकश्छलकइवदृश्यतेकीदृक्सन्तारंतारस्वरंयथास्यादेवंगायन् विप्रलंभादिप्रधानगीतीरुच्चारयन् छायांरूपलावण्यकांतिवेषादिकृतशोभांवहन् धारयन् चारुसलीलंव्रजन्नतएवयूनांतरुणानांमनश्चित्तंछलतिविक्लवीभवतिअविप्रकृष्टतमंपिटलतमंस्मरातिरेकादतिशयेननिःसत्वंकुर्वन्॥ ठकोपिहिठकतागोपनार्थंलोकछलनार्थंचतारंगायतिछायांशिष्टजनोचितांवेषादिशोभांवहतिचारुशिष्टजनोचितंगच्छतितनश्रूर्णक्षेपादिनालोकानांमनोविक्लवीकरोतीति॥ श्रीः॥ जानंस्यक्तसमान्प्राणांश्चरंष्टंकारिकार्मुकः॥ परांश्छ्यन्भटलोकोस्मिंस्त्रायकःशरणार्थिनां॥ ४९॥ श्रीः॥ अस्मिन्पुरेभटलोकःशरणार्थिनांप्राणेषिणांत्रायकोरक्षकोस्ति॥ एतेनात्रत्यलोकस्यनिर्भयत्वोक्तिः कीदृक्चरन् गच्छन्तयाप्राणान्त्यक्तसमान्त्यक्ततुल्यान् अकृतवत्साम्यादिकार्यपरित्याज्यान्जानन्न एतेनसात्विकलोक्तिःतथाटंकरोतीत्येवंशीलंटंकारिकार्मुकंधनुर्यस्यसनिरंतरंधनुरास्फालयन्नित्यर्थः एतेनधनुर्विद्याकौशलोक्तिःतथापरान्शत्रून्छ्यन्विनाशयन् एतेनबलिष्ठत्वोक्तिः॥ श्रीः॥ अंगान्यस्मिंस्युरंष्टाभ्रुकुचोभातिवधूजनः॥ प्रशान्चरन्त्समरुत्कोपिकोपिनेवात्रदारुणः॥ ५०॥ श्रीः॥ अस्मिन्पुरेगोठकारवद्वृत्तोकुचोस्त्रनोयस्यसवधूजनः कुलांगनालोकोअंगानिस्तनादीनवयवान्थुडन्नुउन्नरीयादिनासंदृष्टवन्मन्यतेकुलांगनानांहिसर्वोगोपांगसंगोपनंशोभातिशयहेतुः॥ तथाअत्रत्समरोखड्गादिमुष्टौकुशलःकुशलइतिकृत्समरुत्कोपिखड्गादिशस्त्रभृद्भटलोकोपिआस्तांवणिगादिरित्यपरार्थः॥ प्र शान्पशांतःसंचरन्नस्तिविचरतीत्यर्थः अतश्चात्रकोपिनेवदारुणोरौद्रःएतेनात्रराजाज्ञायाअतिसौष्ठवमुक्तं॥ व्रजंश्चारुप्राणांश्चरंष्टंकारिअस्मिंश्चकःथुडंष्ठाभगायुस्तारंअस्मिंस्त्रायकःजानंस्यक्तअस्मिंस्थुडन्नित्यत्रनोप्रशानइत्यादिनाशषसाअनुस्वारानुनासिकोचपूर्वस्यअत्रशानिनिकिंप्रशान्चरन्अधुधरइतिकिंचरन्समरुत्कः॥ श्रीः॥ पुंस्कामाअप्यपुंश्चल्यइहपुंस्कोकिलस्वनाः॥ अपुंश्चल्नेरपुंस्वेटैःपुंश्चेकैर्भातिभर्तृभिः॥ ५१॥ श्रीः॥ इहपुरेस्त्रियोभर्तृभिःसहभातिकीदृश्यःकोकिलःपरपुष्टःपुमांश्चासौकोकिलश्चपुंस्कोकिलस्तस्यस्वरनस्वरायासांतास्तथापुंस्कामाअप्यपुंश्चल्यःपुमांसंकामयंतेपुंस्कामाःपुमांसंचालयंतियुंश्चल्यःकुलटानताश्चअपुंश्चल्यःसत्योपिविरोधेपुंमात्रकामनाविवक्षायाविरोधाअविरोधस्तस्वपतेरेवकामनाविवक्षयाअत

एवअपुंश्चल्यःकिंभूतैर्भर्तृभिःपुंश्चेकैःपुरुषेषुविदग्धैःतथाअपुंस्वेटैःस्वेटाअधमाःपुमांसःस्वेटाःपुंस्वेटाःनतथाअपुंस्वेटाःतैःपरदारसेवादिनिंद्यकर्मरहितैरित्यर्थः अतएवअपुंश्चल्नैःनपुंसाअन्येनपुरुषेणआलादितैःविदग्धतयासदाचारतयाचसर्वपुरुषेषुमुख्यैरित्यर्थः भवतित्युत्तमगुणानांपतीनांसंबंधःशोभातिशयहेतुः॥ श्रीः॥ नपुंष्टिट्टिभपुंश्चोराःनचपुंस्वलपुष्टकाः॥ नपुंस्फल्गुर्नपुंस्फेरुर्नपुंस्पशुरिहक्वचित्॥ ५२॥ श्रीः॥ टिट्टिभाउत्पादशयनाःपक्षिभेदाःपुमांसःटिट्टिभाइवउद्धतत्वात्पुंष्टिट्टिभाःतथापुमांसश्चतेचोराश्चपुंश्चोराःद्वंद्वेपुंष्टिट्टिभपुंश्चोराइहपुरेक्वचित्कस्मिन्नपिस्थानेनसंतिएवंसर्वत्रास्तिक्रियानत्रासहयोज्याखलाडुर्जनाःपुमांसश्चतेखलाश्चपुंस्वलाएवंपुंष्टकाःपुंश्चलकाःततोद्वंद्वःतथापुंस्फल्गुःपुमर्थविकलत्वेननिष्फलःपुंस्फल्गुःतथापुमान्फेरुरिवभीरुत्वात्शृगालइवपुंस्फेरुःतथापुमान्पशुरिवमूर्खत्वात्पुंस्पशुः॥ श्रीः॥ पुंस्त्रष्टैःपुंस्तमैःपुंस्त्वपुरस्कृतैःसहसौहृदं॥ पुंष्टकुराःसपुंस्पट्टाःपुंगवाअत्रकुर्वते॥ ५३॥ श्रीः॥ अत्रपुरेपुंमांसोगावइवपुंगवानरश्रेष्ठाःपुंस्तमैःश्रेष्ठपुरुषैःसहसौहृदंमैत्रींकुर्वतेकिंभूतैःपुंस्त्वपुरस्कृतैःपुंस्त्वेनपुरुषकारेणशौर्येणपुंस्कृतस्तेःप्रसिद्धैःअतएवपुंस्त्रष्टैःपुरुषेश्वयेसरैःपुंगवाअपिकिंभूताःपुंष्टकुराःपुंसांमनुष्याणांटकुराःस्वामिनःअतएवसपुंस्पट्टाःपुंसांपुरुषाणांषट्टःसमूहःतेनसहिताःसपुंस्पट्टाःपुरुषौघान्विताइत्यर्थः॥ एतेनात्रत्यजनाःगुणिनोगुणानुरागिनश्चेत्युक्तं॥ श्रीः॥ पुंश्चूराअत्रपुंष्टकाःपरपुंस्कृकृतासहाः॥ अपुंस्कड्डाःप्रकुर्वंतिसेवांचोलुक्यभूभुजां॥ ५४॥ श्रीः॥ अत्रपुरेपुंष्टकाःपुंमांसःपोरुषोपेताःयेटकाःक्षत्रियजातिभेदाःनचोलुक्यभूभुजांमूलराजादीनांसेवांप्रकुर्वंतिकीदृशाःपुंश्चूराःपुंस्कपोरुषोपेतेषुभटेषुशूराअतएवपरेयेपुमांसस्तेषांयत्पुंस्कृतंन्यक्कारायमुखविकृतिपूर्वशब्दविशेषःतस्याप्यसह्माःअक्षमाःतथापुंस्कड्डाःपुमांसश्चतेस्कड्डाश्चपुंस्कड्डाःनतथाअपुंस्कड्डाः॥ पुंस्कामाःपुंस्कोकिलअपुंस्वेटैःपुंस्वलअपुंश्चल्यःपुंश्चोराःपुंश्चेकैःपुंष्टिट्टिभपुंष्टकाःपुंष्टकुराःपुंस्तमैःपुंस्त्वपट्टाःपुंस्पशुःपुंस्त्रष्टैःपुंस्फल्गुपुंस्फेरुरित्यत्रपुमोअशिटीत्यादिनासोतादेशोअनुस्वारानुनासिकोचपूर्वस्य॥ असिटीतिकिंपुंश्चूराःअयोषइतिकिंपुंगवाःअधुधरइत्येवअपुंस्कड्डाःअरण्यागीतिकिंपुंरण्यातेः॥ श्रीः॥ नॄःश्रीणन्किंहरिश्चंद्रोनॄःपाताकिंपुरूरवाः नॄन्पुष्यन्किं

मुमांधातेत्यत्रातर्क्यतभूपतिः॥ ५५॥ श्रीः॥ अत्रपुरेभूपतिर्नृनृप्रजाःप्रीणन्मधुरवचनादिदानेनस्करवयन्सकिमयं हरिश्चंद्रस्तृतीयचक्रीहरिश्चंद्रेणाहि प्रजाअत्यंतंप्रीणिताइत्येवंप्रकारेणअतर्क्यतसंभाव्येतनेतिसंबंधः अग्रेप्ये वंयोजनाकार्या पाताचोरादिभ्योरक्षन्पुरूरवाःचतुर्थचक्रीपुण्यान्नित्यत्रपुषिरंतभूतपिगर्थः सकर्मकोदानसंमा नादिनापोषयन्नित्यर्थःमांधाताआद्यचक्री॥ नृन्प्रीणन्नृन्नृपतेत्यत्रनृनःपेषुवेतिरोतांदेशोवाअनुस्वारानुनासि कोचपूर्वस्यपक्षेनृन्पुण्यन्॥ श्रीः॥ कांस्कान्रथान्भटान्कांस्कान्श्वान्कांस्कानिभानिह॥ नपश्यतिसहस्राक्षोदृक् सहस्रंकृतार्थयन्॥ ५६॥ श्रीः॥ सहस्राक्षइंद्रोदृक्सहस्रंकृतार्थयन्कृतार्थमाचक्षाणःसन्निहपुरेकांस्कान्रथा न्कांस्कान्भटान्पत्तीन्कांस्कान श्वान्कांस्कानिभांश्चनपश्यतिकिंतुसर्वानपिगजादीन्सर्वोत्कृष्टगुणैर्निरुपम त्वेनअदृष्टपूर्वदर्शनात्त्वमक्षिसहस्रंसफलंमन्यमानःसहस्राक्षःसतर्षंपश्यतीत्यर्थः एतेनात्रचतुरंगबलसंपद्विशे षउक्तः॥ कांस्कान्इत्यत्रद्विःकांनःकांनिसइतिसोंतादेशोअनुस्वारानुनासिकोच पूर्वस्य॥ द्विरितिकिं कांस्कान्॥ श्रीः॥ रत्नसंकरसंस्कारितष्टपश्येदिदंयदि॥ संस्कर्तुस्वःपुरींकंकमुपस्कारंनचिंतयेत्॥ ५७॥ श्रीः॥ रत्नानांनानाजातीया नांमणीनांसंकरोमेलकस्तेनसंस्कारःशोभातिशयोविद्यतेयत्रतद्रत्नसंकरसंस्कारि इदंपुरंत्वष्टादेववर्धकिःयदि पश्येत्तदास्वःपुरींअमरावतींसंस्कर्तुविशेषुंकंकमुपस्कारंप्रयत्नंनचिंतयेत् किंतुयेनयेनप्रयत्नेनस्वःपुरीएतत्पु रसदृशीस्यात्तंतंसर्वमपिपरिभावयेदित्यर्थः एतेनास्यस्वःपुरीसकाशाद्व्यधिकरम्यत्वमुक्तं॥ श्रीः॥ नयथाको पिसंस्कर्तासंचस्कारयथानच॥ अरोचकीगुणेष्वत्रसंस्कर्तुयततेनतथा॥ ५८॥ श्रीः॥ अत्रपुरेनरोचतेधान्यंक्षुधः अभावादस्मिन्नास्तिपुंसिचेतिणकेरोचकोबुभुक्षायाअभावःसोस्त्यस्यघ्राणिस्थादित्यादिनारुग्वाचित्वादिनिअरो चकीनरोगुणेषुव्यंजनेषुविषयेसंस्कर्तुहिंगुकर्पूरादिक्षेपेणतथातेनप्रकारेणयततेप्रवर्तनेयथाकोपिपुमान्न संस्कर्तानसंस्करिष्यतियथाकोपिनचनैवसंचस्कार॥ संस्कर्तुमित्यत्रस्मृष्टिसमइतिसोंतादेशोअनुस्वारानुना सिकोचपूर्वस्यसगीतिकिंसंकरलुग्विक्षेपेसंकरणंसंकरोअलंकुगोभावात्नात्रसइसंचस्कारइत्यत्रनुव्यवधा नान्नभवतिसमइतिउपस्कारंसंस्कर्तेत्यत्रलुगितिलुगंतादेशः पृथग्योगादनुस्वारानुनासिकोच पूर्वस्येतिनिष्ट त्तमितितोनभवतःकेचित्तुअत्रापिअनुनासिकमिच्छंतिसंस्कर्तुं॥ श्रीः॥ चतुरंचंचलत्यश्वामंदंदंडमतिहिपाःरम्य

यनयोर्लोकक्षणयोःप्रीतिराह्लादःस्यात्तथाएषांश्रीर्लक्ष्मीर्वर्तनेतथाएभ्यःसकाशाडुत्सवावसंतोत्सवादि
रिहभवतेतेनतथाएषुधर्मादेवपूजादानादिरस्तिभोगधर्मफलत्वेनैषांलक्ष्मीर्ननिरर्थिकेत्यर्थइति॥श्रीः॥भ
क्त्यागुरुषुपित्रोश्चमोक्षायज्ञानसंग्रहात्॥जनेनाजरसाप्यत्रस्फुरज्जरसिनस्थितं॥१३३॥श्रीः॥ अत्रपुर
जनेनाजरसापिजरावर्जितेनापिस्फुरंतीजरायस्यतेनस्फुरज्जरसिनदृढेनस्थितं॥हेदूआहगुरुषुध
र्माचार्येषुपित्रोश्चमातापित्रोश्चविषयेभक्त्याविनयेनतथामोक्षायय तज्ज्ञानंधर्मशास्त्रपरिज्ञानंतस्ये
वनतुसंसारहेतुकामशास्त्रादिज्ञानस्ययःसंग्रहोधारणंतस्माच्चपरिणतानांहिप्रायेणधर्मार्थितयावि
नयोमुक्तिहेतुज्ञानसंग्रहश्चस्यादनतुयूनांमदमदनबाङ्ल्यात्॥श्रीः॥ सर्वस्यइरजरसःप्रत्यासन्नजर
स्यच॥योगिनातिजरणेहस्पर्धाध्यात्मेसदालयात्॥१३४॥श्रीः॥ इहपुरेसर्वस्यइरजरसः तरुणस्यप्रत्या
सन्नजरस्यचदृढस्यचकर्तरिषष्ठी अतिजरणयोगाभ्यासप्रकर्षाज्जरामतिक्रांतेनयोगिनासह सदास्पर्धा
जयेच्छाअस्ति॥कस्मादित्याह आत्मनिविभक्त्यर्थेव्ययं भावेअन्यइत्यतिसमासांतेचअध्यात्मनस्मिन्ना
त्मनियोलयःसर्वथाबाह्येंद्रियविरोधेनतदेकाग्रचित्तताततस्माद्भ्ययइत्यादिनापंचमीलयमाश्रित्ययद्वत्स
ध्यानंयोगींद्राःकुर्वंतिनादृगत्रत्योलोकःसर्वोपिकरोतीत्यर्थः॥अध्यात्मेइत्यत्रसामान्यविशेषभावेनद्वौभा
वोयथाआसनेआस्तइत्यत्रआसनंसामान्यविशेषभिन्नं अध्यात्मेइतिह्यात्मनियोभावस्तत्रलयइतिवि
ज्ञायतेतत्रसामान्यभावोदृत्रावंतर्भूतस्तंप्रत्याधारभावश्चयोसौलयोविशेषभावःसदृत्रानंतर्भूतस्तंप्रति
सामान्यभावस्यआधारभावश्चेतितत्रसप्तमीभवति॥एषुएषांएभिःएभ्यःनयनयोरित्यत्रएद्बहुस्नासीत्य
नू॥बहीतिकिंअस्यस्तोसीतिकिंगृहान्॥अतइत्येवगुरुषुपित्रोःजननेनअतिजरणसर्वस्यप्रत्यासन्नजर

स्येत्यत्रटाडसोरित्स्यादिनिनस्यादेशो॥अतइत्येवअजरसाद्दूरजरसःअत्रपरत्वान्नित्यत्वाच्चआगेवजरसा
देशेकृतेअकारांतत्वाभावः अन्यतुआगेवनादेशसन्निपातलक्षणस्यानित्यत्वाश्रयेणत्वात्पश्चाज्जरसादेशंचे
च्छनःस्फुरज्जरसिनइत्यपिमन्यंते॥मोक्षायसंग्रहादित्यत्रदेडस्यार्यानावितियआदादेशो॥अथात्रकाव्येवृ
र्णनीयेषुचोलुक्येषुमध्येप्रथमंयोराजाअत्रपुरेअभूत्तमासर्गांतमुपन्यस्यतिकथयति॥श्रीः॥ सर्वस्मैप्रियकर्ता
स्मिन्सर्वस्माडज्वलोगुणैः॥नृपःश्रीमूलराजोभूच्चौलुक्यकुलचंद्रमाः॥१३५॥श्रीः॥ मूलेचौलुक्येध्रादाव
त्रपुरेराजामूलराजोयद्वामूलेमूलनक्षत्रेराजाचंद्रोमूलराजस्तत्रजातत्वान्मूलराजः श्रियायुक्तोमूलराजःश्रीमू
लराजानामनृपाभूत्॥कीदृक्गुणैःपरोपकारत्वादिभिःकृत्वासर्वस्मात्समस्तलोकात्सकाशाडुज्वलोअतएव
सर्वस्मैप्रियकर्तावांछितकारीअतएवचौलुक्यकुलचंद्रमाः॥चंद्रमाअपिगुणैःकांतनादिभिःसर्वस्माडुज्वलो
अतएवसर्वस्मैप्रियकर्तातथाश्रियआवासत्वाद्भियानक्षत्रपतित्वान्मूलस्यमूलनक्षत्रस्यचराजाप्रभुःस्यादि
त्यकिः॥श्रीः॥ विश्वस्मादत्यशेतासौविश्वस्मायुपकारकः॥किंसर्वस्मैपुरसर्वस्मैचयः कामदोभवत्॥१३६॥
श्रीः॥ योविश्वस्मैहीनोन्नमायचउपकारकोरक्षादिनाउपकर्तासन्किंसर्वस्मैकुत्सितसर्वस्मैहीनलोकायपर
सर्वस्मैचप्रकृष्टसर्वस्मैउन्नमलोकायचकामदोमनोरथपूरकोभूत्॥असौमूलराजोविश्वस्मात्सर्वलोका
दत्यशेतउत्कृष्टोभूत॥श्रीः॥ तमस्तोभिभवःकालेप्यसर्वस्मिन्महोदयःहीनतास्माडुभौहेतूउभयस्मिन्रवी
विधौ॥१३७॥श्रीः॥ उभौहेतूसर्वादेःसर्वाडतिप्रथमायाद्वितीयायाचाद्विवचनेद्वाभ्यांकारणाभ्यामस्मान्नृपा
त्सकाशाडुभयस्मिन्हितयहीनतान्यूनत्वमासीत्॥कस्मिन्नुभयस्मिन्नित्याह॥रवीसूर्यविधौचंद्रेच॥को
हेतूइत्याहतमस्तोराहोःसकाशादभिभवोयद्गणलक्षणःपराभवःअपिःसमुच्चयेतयाअसर्वस्मिन्कालेमहो
दयःनसर्वस्मिन्कालेमहान्जगत्प्रकाशकउदयःस्यादरेर्दिनएवचंद्रस्यचरात्रावेवमहोदयात्अ
स्यचराज्ञस्तमस्तोअज्ञानानाभिभवःराज्यलक्ष्मीप्रतापादीनांसदादृध्यासदामहोदयश्चेति॥श्रीः॥अ
न्यस्मैभास्करायान्यतरस्मैविष्णुशंकरयोः॥रुद्राणामन्यतमस्मैनमोस्मैचक्रिरेनृपाः॥१३८॥श्रीः॥ नृपाअ

स्मैमूलराजायनमोनमस्कारंचक्रिरेयतः अन्यस्मैभास्कराय महाप्रतापत्वाद्द्वितीयायरवयेतथाविष्णुशङ्कयो
र्मध्येअन्यतरस्मैएकतरस्मैप्रजारक्षामरमैश्वर्यादीनामुभयधर्माणांसद्भावाद्विष्णवेशङ्कायवेत्यर्थः तथा
रुद्राणामन्यतमस्मैलीलाविलासित्वादिनाअजएकपादअहिर्बुध्न्यविरूपाक्षरेवतहरबहुरूपत्र्यंबकसावि
त्रजयंतपिनाकिनाम्नामेकादशरुद्राणांमध्येअजायवापिनाकिनेवाइत्यर्थः भास्करादिभ्याहिदेवतात्वान्नृपा
अपिनमस्कारंकुर्वंति ॥श्रीः॥ देवेभ्योन्यतमायास्मायितरस्मैफणीशिने ॥श्लाघित्वाप्रधियःकुर्युःकतरस्मै
पुनस्कृतिं ॥१३९॥ श्रीः॥ अस्मैनृपायश्लाघित्वानृपंश्लाघ्यंपरलोकेज्ञाप्यं ज्ञाननप्रयोज्यनृपंवर्णयित्वेतिया
वत्प्रधियःकतरस्मैकस्मैराज्ञेपुनस्कृतिंकुर्युः॥ यतःकीदृशायदेवेभ्योन्यतमायशक्तिरूपायनिशयेनदेवा
नांमध्येएकतरस्मैतयाइतरस्मैफणीशिनेभूभारधारित्वेनद्वितीयायशेषायस्फुरणेषाद्वितुल्यत्वेनसर्वनृपो
त्कृष्टत्वादस्यश्लाघायोक्तायोमन्यस्यश्लाघांकर्तुनकोपिवांछतीत्यर्थः॥ निर्धारणेपंचम्यन्येइतिनन्म
तमाश्रित्यदेवेभ्यइत्यत्रनिर्धारणेपंचमीकतरस्मायित्यत्रसंप्रदानेचतुर्थी ॥श्रीः॥ यतरस्मैतत्तरस्मैप्रार्थ
यित्वेददावसौ॥ यतमस्मैतनमस्मैदोषकर्त्रेचुकोपच ॥१४०॥ श्रीः॥ स्पष्टः किंतु यतरस्मैतनरस्मैशत्रवेमि
त्रायचयतमस्मैतनमस्मैमित्रायशत्रवेचदोषकर्त्रेअन्यायकारिणे ॥ श्रीः॥ दातृधेकतमस्मादेकतरस्मा
च्चदस्त्रयोः॥ कतमस्मिन्सर्वतमेदेशेस्माकाभ्यगाद्यशः॥१४१॥ श्रीः॥ अस्मान्नृपात्सकाशात्सर्वतमेअतिश
येनसर्वस्मिन्देशेकतमस्मिन्कस्मिन्यशोनाभ्यगात्तनयोसर्वशब्दोत्रतमपिअसंकुचितवृत्तिस्तोत्र
गत्रयेप्यस्ययशोविस्तीर्णमित्यर्थः यतोदातृपुमध्येएकतमस्मादसाधारणात्तयानृपातिशयेनदस्त्रयो
रश्विनीकुमारयोर्मध्येएकतरस्मादन्यतरस्मात्दानरूपातिशयेनहिप्रसरतिदिशोदशयशोनरस्य ॥श्रीः॥
तस्माद्याञ्चापराविंद्रोपेंद्रोदानैकशालिनः॥ नेमस्मायपिकल्पेतेनास्यहेतुंगुणत्वतं ॥१४२॥ श्रीः॥ हेतुंत्व
च्छब्दःसमुच्चयार्थः शौर्यादार्यादिगुणसमूहेनहेतुनाइंद्रोपेंद्रोशक्रविष्णूअस्यराज्ञोनेमस्मायपिरवज्ञा
याप्यथाङ्गुणशकलायापिनकल्पेतेनालंभवतः यतोदानेनैकनअद्वितीयेननतुयाच्ञयाशालतेशोभतइत्य

वंशीलोयस्तस्यप्रभूतगुणेरिंद्रोपेंद्रोदानेकशालिनोस्यगुणांशमात्रस्यापितुल्योनभवतइत्यर्थः अतस्तस्मा
दन्यस्माद्याञ्चापरोयाचकोनास्ति ॥ इंद्रोहिबलिश्चबलिनिर्देत्येअप्रभवन्विष्णुंबलिंबध्नंयाचेनंविष्णुश्चत्रिपदी
मितियाञ्चायांचसर्वेगुणाभ्रंशतेउक्तंच॥ देहीतिवचनंश्रुत्वादेहस्थाःपंचदेवताः॥ नश्यंतिलक्षणादेवश्रीकी
र्धीधृतिकीर्तयः॥ गुणास्तावद्यशस्तावद्यावद्याचेननोनरः॥ प्रार्थनायांपुनस्तेपिप्रणश्यंतिहनाइव ॥श्रीः॥ पूर्व
स्माच्चपरस्माच्चसमस्मादसमाद्गुणैः॥ उत्कृष्टोराजकादन्तेसिमस्मैस्मैषविस्मयं ॥१४३॥ श्रीः॥ एषराजासिमस्मै
सर्वलोकायविस्मयमाश्चर्यंदत्तेस्म॥ यतःपूर्वस्माच्चएनंदर्पेक्षयाजन्मनाप्रथमात्परस्माच्चजन्मनापश्चिमाच्चकि
बहुनाममस्मात्सर्वस्माद्राजकान्नृपोघाद्उत्कृष्टउत्तमः ननुतद्राजकंविगुणंभविष्यतितन्मध्येवासोकेनाप्येकेन
गुणेनयुक्तउत्कृष्टेभविष्यतियथाअंधेपुकाणेपिभातीतिनिर्गुणत्वनिराकरणायाहगुणैःशौर्यादिभिरसमादसा
धारणात्॥ श्रीः॥ दक्षिणस्मादुत्तरस्मादपरस्मात्तथान्यतः कृष्णायास्मायवरस्मायधरस्मिन्नकोननः॥१४४॥
श्रीः॥ दक्षिणस्माद्उत्तरस्मादपरस्मात्पश्चिमात्तथान्यतःपूर्वस्माच्चदेशादागत्यास्मैराज्ञेअधरस्मिन्नधोदेशेपा
दयोःकोननतः॥ यतःप्रजारक्षाप्रतापादिनाअवरस्मैकृष्णायद्वितीयायविष्णवेकृष्णायहिसर्वदेशेभ्यआगत्य
जनःप्रणमतिएतेनास्यराज्ञःसर्वजगद्वशीकारउक्तः॥ दक्षिणस्मादित्यादौकुभूलात्पचतीत्यादाविवोपात्तवि
षयेअपादानेपंचमी॥ श्रीः॥ परस्मायास्पृहयालुःस्वस्मायश्लाघनःसदा॥ दक्षिणायद्विजस्वायस्वस्मायिवददा
वसौ॥१४५॥ श्रीः॥ असौराजादक्षिणायप्रवीणायद्विजस्वायब्राह्मणजातयेस्वस्मायिवआत्मीयायस्वजना
यइवसदागोधनादिददोदातास्यन्यायेनपरद्रव्याणिगृहीत्वादत्तसर्वत्रनिंद्यएवस्यादित्याहपरस्मायअन्यद्र
व्यायअस्पृहयालुःअन्यायेनपरद्रव्यमगृह्णन्नित्यर्थः एवंभूतोपिदत्वाविकत्थनोनिंद्यएवस्यादित्याहस्वस्मै
आत्मनेअश्लाघनः॥ श्रीः॥ चक्रुरस्यारयोवस्त्रायांतरस्मैकृतस्पृहाः॥ अंतरायाःपुरायाञ्चामंतरस्माद्गृहादपि
॥१४६॥ श्रीः॥ अस्यराज्ञोअरयःपुरमध्यमास्मवयंप्रत्यभिज्ञायामहीसाशंकयापुरेषुध्रुवेष्टुमशक्यत्वादंतरा
याःपुरश्चडालादिपुरोःसकाशादंतरस्माद्गृहादपिअपिःसमुच्चयेनगरबाह्याच्चंडालादिगृहयुक्ताद्गृहानगरा

भ्यंतरगृहाच्चसकाशाद्याञ्चांवस्त्रप्रार्थनांचकृः यतोऽंतरस्मैवस्त्रायकृतस्पृहाः अतिनिःस्वत्वेनवस्त्राभावा
द्वस्त्रंचतुर्थ्यमध्येतृतीयायचतुर्थायवास्पृहयालवः एवंचानेनराज्ञाशत्रवोनिराकृताइत्यर्थः॥ श्रीः॥ अमु
ष्मैनेजसेकस्मैयस्त्वस्थेसमरांतरे॥ कृतांतःकुपितस्त्वस्मैतस्मिन्देवंपराङ्मुखं॥ १४२॥ श्रीः॥ समरांतरेरणम
ध्येयोऽगतिस्तेनसाप्रतापेनएकस्मैअहितीयायअमुष्मैराज्ञेतस्थेस्थानेनात्मानंवीरंप्रकाशितवान्तस्मै
शत्रवेकृतांतःकुपितस्त्वथातस्मिन्शत्रौदेवंपराङ्मुखंसमृतएवेत्यर्थः॥ अमुष्मैइत्यत्रश्लाघह्नुङ्स्थेत्यादिनाच
तुर्थीतस्थेइत्यत्रज्ञीप्सास्थेयइत्यात्मनेपदं॥ श्रीः॥ यस्मायेतस्मैशात्रवकयोर्घोर्भुवस्तथा॥ तादृशोस्मा
दृशांपुण्यैरित्यस्याधिष्ठवासवः॥ १४८॥ श्रीः॥ भवादृक्कीदृगेतस्मिन्नतिसर्वंयदीर्ष्यसि॥ उत्तरकोशलेमंत्रइत्थ
मस्योद्यमे भवत्॥ १४९॥ श्रीः॥ अस्यमूलराजस्योद्यमेविजययात्रायांसत्कृतरेकोशलसामीप्यकाधारेअत्र
समभीउत्तरकोशलाख्यनृपसमीपेमंत्रःकोशलेनृपमंत्रिणामभूत्कथमित्याहहेराजन्तादृशोभवत्सदृ
शोभूपोऽस्मादृशामस्माकंपुण्यैर्वर्ततइत्येवंप्रकारेणयस्मायेतस्मैराज्ञेवासवइंद्रोप्यस्पाधिष्ट॥ यतःकिंभूता
यद्वकयोर्हयोःशात्रवरक्षित्रकयोर्हकयोरित्याह द्योःस्वर्गस्यतथाभुवःपृथ्व्याश्चअन्यायिभ्योद्युसोरक्षन्भु
वःशास्तान्यायकरग्रहोपार्जितधनेर्यागान्कारयन्द्योश्चशास्तायतोयज्ञेषुवङ्क्रोविधिवद्धुतंदत्तवानामुपतिष्ठ
तेइतिश्रुतिः॥ तथाचोक्तंरघुवंशे॥ दुदोहगांसयज्ञायसस्यायमघवादिव॥ संपद्विनिमयेनोभौदधतुर्भुवनद्वय
मिति॥ अतिसर्वबलादिनाविश्वत्रयेप्युत्कृष्टत्वात्सर्वमतिक्रांतेएतस्मिन्मूलराजविषयेकोशलेश्वरयत्त्वमी
दृक्कीदृक्कीदृशःकियन्मात्रइत्थ॥ यस्मायेतस्मैइत्यत्रयदेतद्ब्रूहावयंनुवाद्यमात्रार्थंप्रतीतिरुक्ता॥ यथा॥ यदेतच्चंद्रातर्जलदलवलीलांधक्कुरुतेतदाचष्टलोकइत्यत्र॥ सर्वस्मै २६
परसर्वस्माकिंसर्वस्मैसर्वस्मात्विश्वस्मैविश्वस्मात्असर्वस्मिन्असर्वस्मिन्नित्येतेषुसर्वादेःस्मैस्मातौडेःस्मिन्नि
त्येताभ्यांस्मैस्मात्स्मिन्नादेशाःउभशब्दस्यद्विवचनस्वार्थैकत्वयविषयत्वात्स्मैप्रभृतयोनस्फःगणपा
ठस्कहेत्वर्थप्रयोगेसर्वविभक्त्यर्थःउभोहेतूउभयस्मिन्॥ अन्यस्मै॥ अन्यतरस्मैइनग्रहणेनैवसिद्धेअन्य

तरग्रहणंडतमन्नत्ययांतस्यान्यशब्दस्यसर्वादित्वनिवृत्त्यर्थंअन्यतमाय॥ अन्येत्वाहुः॥ नायंडतरन्नत्ययांतोअ
न्यतरशब्दःकिंत्वव्युत्पन्नस्तरोत्तरपदस्तरबंतोवातन्मतेडतमांतस्याप्यन्यशब्दस्यसर्वादित्वं अन्यतमस्मैइत्
रस्मैडतरडतमोन्नत्ययोतयोःस्वार्थिकत्वात्प्रकृतिद्वारेणैवसिद्धेप्रथमगुणादानमन्नप्रकरणेअन्यस्वार्थिकन्नत्ययां
तानामग्रहणार्थंअन्यादिलक्षणपदार्थंचकतरस्मैकतमस्मिन्यतरस्मैततरस्मैततमस्मैएकतरस्मात्एक
तमस्मात्इहनभवतिसर्वतमे॥ त्वशब्दोऽन्यार्थःत्वस्मात्त्वच्छब्दःसमुच्चयेतस्यस्मायादयोनभवंतीति
हेत्वर्थयोगेसर्वविभक्त्यादिप्रयोजनंगुणत्वंहेतुंनेमशब्दोधार्थः॥ नेमस्मै॥ समसिमौसर्वार्थौसमस्मात्
सिमस्मैसर्वार्थत्वाभावेनस्यात्असमात्स्वाभिधेयापेक्षत्वावधिनियमेव्यवस्थापरपर्यायेगम्यमानेपूर्व
परावरदक्षिणोत्तरापराधराणिपूर्वस्मात्परस्मात्अवरस्माद्दक्षिणस्मात्उत्तरस्मात्अपरस्मात्अधर
स्मात्॥ व्यवस्थायाअन्यत्रनस्यात्॥ दक्षिणायद्विजस्मायअपरस्माय॥ आत्मात्मीयज्ञातिधनार्थवृत्तिः
स्वशब्दआत्मात्मीययोः॥ स्वस्मैस्वस्माइव॥ ज्ञातिधनायास्कनयद्विजस्मायपरस्मायबहिर्भावेनबात्मनवा
योगेउपसंव्यानेउपसंचीयमानेचार्थेअनंतरशब्दोनचेद्बहिर्योगेपिपुरिवर्तते॥ अंतरस्मात्गृहात्॥ अं
तरस्मैवस्त्राय॥ पुरितुन॥ अंतरायाःपुरः॥ बहिर्योगोपसंव्यानादरन्यत्रतुनस्यात्॥ समरांतरेअन्यस्मैत
स्मैयस्मैअमुष्मैअस्मैएतस्मैएकस्मै॥ द्वियुष्मदस्मद्भ्यांस्मादयोनसंभवंतीतिसर्वविभक्त्यादयःप्रयो
जनंहकयोःतादृशःभवादृक्अस्मादृशांकीदृक्सर्वत्रामिसंज्ञायांसर्वादयोनस्फस्नेनेहनस्यात्॥ उत्तरको
शलसर्वादेरितिषष्ठीनिर्देशेनतत्संबंधिविज्ञानादिहनभवति॥ अतिसर्व॥ श्रीः॥ नेमदासीकृतानेमाह
ताश्चानेनभूभुजः॥ अर्द्धेहिपाहयाश्चाद्याःसन्नद्धाःसर्वएवन॥ १५०॥ श्रीः॥ अनेनराज्ञानेमेअर्धाःभूभुजो
राजानःदासीकृताःतथानेमाश्चभूभुजोहताःयेनृपास्तंप्रणतास्तेसेवकीकृताःयेतुदर्पोद्धुरत्वान्नप्रणतास्ते
समूलमुन्मूलिताइत्यर्थः॥ तत्किंतज्जयायसर्वंसैन्यंसन्नद्धमित्याह अर्धेइत्यादि॥ एतेनअस्यसैन्यस्याति
बाहुल्यमुक्तं॥ श्रीः॥ पूर्वंनेजस्विनाभूवन्नग्रथमचरमेपिच॥ नग्रथमानचरमाउदितास्मिन्नरावविव॥ १५१॥

॥पूर्वमूलराजोदयात्प्रथमंप्रथमेमुख्याःचरमेचअमुख्याश्चापिनृपास्तेजस्विनःप्रतापिनोभूवन्नअभवन्नअस्मिन्नृपेमहाप्रतापित्वाइवविषादितेसतिनप्रथमास्तेजस्विनोभूवन्ननचचरमाःसूर्योदयादपिपूर्वंरात्रौप्रथममुख्याश्चंद्रग्रहाश्चरमेपिचामुख्यानक्षत्रतारास्तेजस्विनोभवंतिरवोउदितेतुननचेति॥श्रीः॥हृयंत्रयश्चतुष्टयंपंचतयाश्चकंचन॥गुणानस्यक्षमावक्तुमल्पेल्पार्गीपतेर्नय॥१५२॥श्रीः॥यूगीपतेर्बृहस्पतेःसकाशान्नाल्पाःवाग्मितयानन्यूनास्तेअल्पेकेचनविरलाःकेपिअस्यराज्ञोगुणान्शौर्यादीन्वक्तुंवर्णयितुंक्षमाःअल्पेपिकियंतइत्याहद्वौत्रयश्चत्वारःपंचवाअवयवायेषांतेतथाद्वौत्रयश्चत्वारःपंचवेत्यर्थः॥हृयेइत्यत्रहावयवयोर्येषामितियच्छब्दवाच्ययोर्हयोरपिगौरवविवक्षायांगुरावेकचेतिबहुत्वाद्बहुवचनमेवस्फुरंक॥श्रीः॥कतिपयेपिगीर्वाणानागाःकतिपयाअपि॥मणयःकोरुकभस्मेवबभूवुर्नास्यसन्निधौ॥१५३॥श्रीः॥कतिपयेपिस्तोकाअपिगीर्वाणाःऊर्ध्ववासिदेवताःनागाःनागकुमाराःऊर्ध्वलोकेअधोलोकेचमूलराजतुल्यानकोप्यभूदित्यर्थः॥शिष्टंस्पष्टं॥सर्वेइत्यत्रजसइरितिइःनेमेनेमाःअर्धंअर्धाःप्रथमेप्रथमाःचरमेचरमाःचतुष्टयेपंचतयाःहृयेत्रयःअल्पेअल्पाःकतिपयेकतिपयाःइत्यत्रनेमार्धेत्यादिनावाजसइः॥श्रीः॥शैलाःपूर्वापरेपूर्वापराश्चजलधेस्तटात्॥सैन्यभरदनक्षुण्णाःकीर्तयंत्यस्यदिग्जयं॥१५४॥श्रीः॥कंठ्यःपरं॥पूर्वापरेइतिपूर्वपूर्वदिग्वर्तिनोअपराःपश्चिमदिग्वर्तिनःपूर्वापरे॥इत्यत्रहंहेतिवाजसइः॥श्रीः॥पूर्वापराद्धियंकर्षन्दक्षिणोत्तरतोप्ययं॥दक्षिणोत्तरपूर्वाणांप्रतीच्याश्चाभवत्पतिः॥१५५॥श्रीः॥पूर्वाचापराचपूर्वापरतस्माद्देवंदक्षिणोत्तरतःचतुर्भ्योपिदिग्भ्यइत्यर्थःशिष्टंस्पष्टंपूर्वापरात्॥दक्षिणोत्तरपूर्वाणामित्यत्रनसर्वादिरितिसर्वसर्वादिकायोभावःसर्वादयस्यादाविति पुनर्वचनंभवत्येवनत्रपूर्वस्यापिस्यादेर्ग्रहणात्॥श्रीः॥ननामास्मैश्रियापूर्वायोजःपूर्वायराजकं॥सोस्मायङ्गावरायेवान्वित्यन्मासावरायनु॥१५६॥श्रीः॥अस्मैराजराजकंनृपोघःननाम॥यतःश्रियासेन्यादिसंपदापूर्वायप्रथमायतयाओजःपूर्वायओजोभिःपराक्रमैःप्रथमायओजसापूर्वायेतितुचाक्स्यओजाजइत्यादिनाअलुक्स्यात्सचराजाअस्मैराजकायअङ्गावरायेवमा

GOVERNMENT OF RAJASTHAN

सावरायनुदिनेनमासेनवालघवेइवअस्मित्यदश्रीयतनतुगर्वेणपराङ्मुखोभूदित्यर्थः॥अङ्गावरायमासावरायएताभ्यांदिनेनमासेनवाभनुज्ञोभ्रांतेवगम्यतेअस्मित्यदितिक्रियापदात्॥श्रियापूर्वायओजःपूर्वायअङ्गावरायमासावरायेत्यत्रतृतीयांतादित्यादिनासर्वादिकार्यंन॥श्रीः॥रूष्णायास्मैद्वितीयस्मैद्वितीयायासिनानृपाः॥द्वितीयस्मात्तृतीयाच्चदेशादेत्यनमोव्यधुः॥१५७॥श्रीः॥गुर्जरत्रादेशापेक्षयाद्वितीयस्मात्तृतीयाच्चदेशाद्उपलक्षणत्वात्सर्वदेशेभ्यइत्यर्थःएत्यागत्यनृपाअस्मैराज्ञेनमःप्रणामंव्यधुःयतःद्वितीयस्मैरूष्णायईदृशायापिकुतइत्याहयतोअसिनाद्वितीयायमहाबलत्वेनसैन्यादिसहायनिरपेक्षयेत्यर्थः॥श्रीः॥द्वितीयस्यास्तृतीयायान्नृपकीर्तेरमर्षणः॥जगत्यस्मिन्द्वितीयस्मिंस्तृतीयेचैषविश्रुतः॥१५८॥श्रीः॥एषराजाअस्मिन्जगतिपृथ्व्यांद्वितीयस्मिन्जगतिपातालेतृतीयेचजगतिस्वर्गेचविश्रुताविख्यातःयतोद्वितीयस्मात्तृतीयायाःस्वकीर्त्यपेक्षयाअन्यस्याअन्यतरस्याश्चउपलक्षणत्वात्सर्वस्याइत्यर्थःनृपकीर्तेरन्यराज्ञयशःकर्मणोअमर्षणःअसोढापरिभावुकइत्यर्थःअतश्चअयमेवसर्वत्रप्रसिद्धइतिभावः॥श्रीः॥तेजसासूर्यजातीयसर्वेषांप्रत्यर्थिनांकांत्याद्वितीयकेंदोर्हर्षोस्मिन्नकृत्रदामभूत्॥१५९॥श्रीः॥तेजसाप्रतापेनकृत्वासूर्यःप्रकाशस्यतस्मिन्सूर्यजातीयसूर्यवत्प्रचंडेअस्मिन्राज्ञिसर्वेषांद्विषांप्रत्यर्थिनांक्षयोभूत्एतत्प्रतापेनापिसर्वेशत्रवःप्रतीनाइत्यर्थःतथाकांत्यासोम्यतयाकृत्वाद्वितीयकेअज्ञातद्वितीयेइंदौचंद्रेचास्मिन्नसर्वेषांस्फुरद्रांमित्राणांहर्षआनंदोभूत्एतद्दर्शनेनापिसर्वेषांस्फुरद्रआनंदिताइत्यर्थः॥अस्मिन्नित्यत्रनेमित्तिकआधारेसप्तमीद्विर्भूयस्फुरद्रइषोर्यंनिमित्तमित्यर्थः॥द्वितीयस्मैद्वितीयायद्वितीयस्मात्तृतीयस्मात्द्वितीयस्मिन्तृतीयेद्वितीयस्याःतृतीयायाइत्यत्रतीयडिंकार्येवेतिवासर्वादिकार्यंडिंकार्यइतिकिं तत्रेवसर्वादित्वंयथास्यान्नान्यत्र॥तेनाकृतस्यात्तथावाकप्रत्ययेसतिस्वार्थकप्रत्ययांतायग्रहणात्मेप्रभृतयोनस्फःद्वितीयकेअर्थवतःप्रतिपदोक्तस्यचयग्रहणादिहनस्यात्॥सूर्यजातीये॥सर्वेषामित्यत्रअवर्णस्यामःसामितिसाम्॥श्रीः॥पूर्वेन्यायेतथाधर्मेपूर्वास्मिन्नेषतत्परः॥पूर्वस्मात्पुरूरवसस्तत्पूर्वान्नाप्यहीयत॥१६०॥श्रीः॥एषराजानाहीयतनन्यूनोभूत्॥कस्मात्पुरूरवसोबोधाच्चतुर्थाच्च

क्रिणःसकाशान्नथापूर्वस्मात्पुरूरवसःएवप्रथमादेतसितुर्बुधाच्चतथातत्पूर्वादपितस्माद्बुधात्पूर्वःप्र
थमःपितावंद्रस्तस्मादपियतःपूर्वेपुरूरवःप्रभृतिपूर्वराजसंबद्धेन्यायेनीतोतथापूर्वस्मिन्धर्मेसदनुष्ठा
नेतत्परस्तन्निष्ठःसर्वनृपाचरितोन्यायधर्मोपालयन्नित्यर्थः॥अहीयतेतिकर्मकर्तरि॥श्रीः॥ पूर्वेदेत्या
बलिप्रायाःपूर्वाःकर्णादयोनृपाःक्षमायांस्मारितास्त्यागक्रियायाअमुनाकिल॥१६१॥श्रीः॥किलेतिसत्ये
अमुनाराज्ञात्यागक्रियायादानाङ्गतोबलिप्रायाःप्रायोबाङ्ल्यतुल्ययारितिविश्वःबलिसदृशाःपूर्वेअग्रे
तनादेत्यास्तथाकर्णादयःकर्णःकोरवपक्षीयोराजानदाद्योदधीचिर्जीमूतवाहनाद्याःपूर्वानृपाश्चस्मारिताः
स्मृतिपथमानीताःबलिकर्णादिवद्ददावित्यर्थः बलिकर्णादयोहिलोकेदानशौण्डत्वेनप्रसिद्धाः॥यदुक्तं॥अ
तिदानाद्बलिर्बद्धः॥त्वंकर्णःशिबिर्मांसंजीमूतवाहनः॥ददौदधीचिरस्थीनिनास्यदेयंमहात्मनां॥
श्रीः॥निस्त्रिंशेबङ्गखड्गायांरिपुकीलालपिप्यधात्॥स्थानमेषानुरक्तायाःक्रीडायेविजयःश्रियः॥१६२॥श्रीः॥
एषराजाअनुरक्तायाःशौर्यादिगुणैरवर्जितायाःविजयःश्रियःक्रीडायेविलासायबङ्गखड्गायामीषद्नख
ड्गायांविस्तृततयापल्यंकतुल्येनिस्त्रिंशेखड्गेस्थानमावासंव्यधादत्तवान्॥यतोरिपूणांकीलालरुधिरेपि
बनियस्तस्मिन्शत्रुच्छेदकेइत्यर्थःशत्रूच्छेदकतदसिखड्गायांविजयश्रीर्निवसतीत्यर्थः॥याप्यनुरक्तास्त्री
स्यात्तस्येरतएवपतिःखड्गायांस्थानंददाति॥पूर्वपूर्वाःपूर्वस्मात्पूर्वात्पूर्वस्मिन्पूर्वइत्येषुनवभ्यइत्यादि
नाईस्मात्स्मिनोवा॥क्रीडायेक्रियायाःअनुरक्तायाःक्षमायामित्यत्रअपोडिन्तामित्यादिनायेयासया
सयामः॥आपइतियकारककिं॥कीलालपि॥तत्संबंधिविज्ञानादिहनभवति॥बङ्गखड्गायनराय॥एत
च्चोदाहरणंस्वयंज्ञेयं॥इहतुभवतिबङ्गखड्गायांनिस्त्रिंशे॥श्रीः॥हितःप्रजायेसर्वस्मैसर्वस्याःसंपदःप
दंख्यातोसौदिशिसर्वस्यांसर्वस्यानृपसंहतेः॥१६३॥श्रीः॥अयंराजासर्वस्याभूतभवद्भाविन्यानृपसंहतेः २८
सकाशात्सर्वस्यांदिशिदशस्वपिदिक्ष्वख्यातोभूत्॥यतःसर्वस्मैप्रजायैहितोअनुकूलस्तथासर्वस्याःसे
न्यकोशादिकायाःसंपदःपदंस्थानं॥सर्वस्मैसर्वस्याःसर्वस्यामित्यत्रसर्वादेरित्यादिनाङपूर्वोपेयासया

स्याम:॥श्रीः॥लीलयाभुजयोर्लक्ष्मीवक्षधेअस्यबिभ्रतःकुंदावदातैरोदस्योर्यशोभिःपूरितेइमे॥१६४॥श्रीः॥
स्पष्टः॥लीलयाभुजयारित्यत्रदोस्यदित्येतदिमेलक्ष्मीवक्षधेबिभ्रतइत्यत्रवर्तते॥श्रीः॥चारुचापेषुधीत्य
क्कोसमरेधस्यैवैरिभिःगुरूभवलताभीतीशिश्रियातेअतिस्त्रियो॥१६५॥श्रीः॥अस्यराज्ञःसमरेषुवैरिभिश्चा
रूणालंकर्मीणोचापेषुधीत्यक्कोभवलताभीतीनिःसत्वताभयंशिश्रियातेआश्रितेकीदृशगुरूमहत्तरेअत
एवअतिस्त्रियोस्त्रीशब्देनात्रस्त्रीगतेभवलताभीतीउपचारादुच्यतेस्त्रियमतिक्रांतेस्त्रीगताबलताभीतिसका
शादप्यधिकइत्यर्थःयदायंराजारणभूमिमाषततितदावैरिणःस्त्रीभ्योप्यधिकमबलाभीताश्चसंतःशस्त्राणि
मुंचंतीत्यर्थःयावपिअतिस्त्रियोब्रह्मचारित्वात्स्त्रियमतिक्रांतोचारूउपशांतनयामनोरमोमनोहारिणो
गुरूआचार्योभवतस्तोचापेषुधीत्यक्कोवैरिभिरपिश्रीयेतेतयाविधेतद्दर्शनेवैरानुबंधोपशमादित्यर्थः॥श्री
अस्माभूवन्ननाहार्याबुद्धयःकामधेनवः॥त्रासादतिस्त्रियोनेनचक्रिरेहयवारयः॥१६६॥श्रीः॥अस्यराज्ञोअ
नाहार्याअकृत्रिमाःमंत्राद्युपदेशंविनापिसंसिद्धाइत्यर्थःबुद्धयोमनोभिप्सितपूरकत्वेनअनाहार्याःकेना
पिहर्तुमशक्याःकामधेनवइवकामधेनवोअभूवन्अतएवअनेनराज्ञाअहंयवोअहंकारिणःअरयस्त्रासा
कीतरतिस्त्रियःस्त्रियोपिसकाशात्कीरवश्चक्रिरेअबलताभीतीगुरूचापेषुधीचारूत्यक्केत्यत्रइडुतोरित्या
दिनाईडितोअस्त्रेरितिकिं॥अतिस्त्रियो॥इदमेवचास्त्रियग्रहणंज्ञापकंपरेणापीयादेशनेतत्कार्येनबाध्यते
इतिनातिस्त्रियःअहंयवःबुद्धयःधेनवःअतिस्त्रियइत्यत्रजस्पेदादित्येदादौ॥श्रीः॥मुनेरपिमुनेरस्य
साधोःसाधारपिस्फुटं॥कीर्तयेचारवेयत्नोज्जज्ञेबुध्याःप्रकर्षतः॥१६७॥श्रीः॥अस्यराज्ञोबुध्याःप्रकर्षतःचार
वेनिष्कलंकायेकीर्तयेस्फुटंप्रकटंयत्नोअभूत्यथायथाकालेकीर्तिस्यान्नयातयाअवर्तिष्टेत्यर्थःबुद्धिप्रक
र्षहेतुगर्भविशेषणहृदयमाह॥मुनेरपिसकाशात्मुनेरत्यंतंजितेंद्रियस्येत्यर्थःतथासाधारपिशिष्टादपिस
काशात्साधोः॥स्याद्धिजितेंद्रियस्यसदाचारस्यचुनरस्यबुद्धिप्रकर्षः॥कीर्तयेचारवेमुनेःसाधोःइत्यत्रएयु
ङित्यादिनाएदौनो॥अदितिकिं॥बुध्याः॥श्रीः॥तेगुणाअमुनाकीर्तिशुचिनात्मनिरोपिताःशंभोःसख्याव

पांपत्यो द्योःपतोचविधोचये॥१६८॥श्रीः॥ शंभोःसख्योधनदेभपांपत्योवरुणेद्योः पत्यौइंडेविधोचंडेचयेगु
णाःऔदार्यपरमेश्वर्यन्यायदाक्षिण्यकारुण्यसौम्यत्वादयःसंतितेगुणाअमुनाराज्ञाआत्मनिरोपिताःस
स्थापिताःअतएवकीर्तिश्चिनामहापुरुषगुणधारिणोहिनिष्कलंकंयशःप्रसरंति॥श्रीः॥ बङ्कपत्योभुवना
नामसख्योरणकर्मणि॥अस्मिन्नरपतोसर्वान्कोगुणान्वक्तुमीश्वरः॥१६९॥श्रीः॥ भुवनानांबङ्कपत्योभुवना
नांपतिर्जगन्नाथोविष्णुःतस्मिन्नीपइनेशौर्यादिगुणेर्विष्णुतुल्येइत्यर्थःअतएवरणकर्मणियुद्धक्रियायां
नास्तिसख्वाअस्यतस्मिन्नसख्योसहायानपेक्षइत्यर्थःअस्मिन्नरपतोमूलराजेवर्तमानान्गुणान्शौर्यो
दीन्कःपुमान्वक्तुंवर्णयितुमीश्वरःशक्तोविष्णुसाम्येनास्यगुणानामानंत्यान्नकोपीत्यर्थः॥ बङ्कपत्यावि
त्यत्रपतिशब्दोयद्यपिभुवनानामित्यपेक्षतेतथाप्यस्यनित्यसापेक्षत्वेननद्वितद्वत्तिस्तेनोभुवनानांबङ्कप
त्यावित्यस्यनृपविशेषणत्वंश्चिनाअमुनेत्यत्रटःपुंसिनेतिनापतोविधोइत्यत्रडिर्डोविनिडोःसख्योपत्या
वित्यत्रकेवलेत्यादिनाओःपताविनिकश्चित्केवलग्रहणंकिंअसख्योनरपतोएषुपूर्वेणडोरव॥ अन्येतु
बङ्कत्रत्ययपूर्वादपिपतिशब्दादोकारमेवेच्छंतिबङ्कपत्यो॥श्रीः॥ हरेःसख्याभुवःपत्यासख्येचास्पृह
यालुना॥स्थितंरणेमुनापत्येवृतश्चायंजयश्रिया॥१७०॥श्रीः॥ अमुनाभुवःपत्याराज्ञारणेस्थितंनकदा
चिदपिनष्टमित्यर्थःनन्वनेनमित्रसाहाय्यान्ननष्टंभविष्यतीत्याहसख्येमित्रायअस्पृहयालुनानिरपेक्षे
णनन्वस्यमित्रमेवनभविष्यत्यतोदेवेनेवअस्पृहयालुःकृतइत्याहहरेःसख्याचसख्येचेतिचकारोऽभ्य
र्थेभिन्नक्रमेऽनेकयागकरणेनस्वर्गस्यतर्पकत्वादिंद्रस्यमित्रेणापिसख्यस्योभयनिष्ठत्वादिंद्रेमित्रस
त्यपीत्यर्थःएतेनातिपराक्रमेशंकिः॥नन्वेवंतहिशत्रुशस्त्रज्वलनेअस्यपतंगायितंभविष्यतिनेत्याहअ
यंराजाजयश्रियापत्येभर्त्रेवृतश्चआत्मभर्तीकृतश्चेत्यर्थः॥श्रीः॥ कांत्यासदृङ्निशःपत्कर्मधोःसख्युश्चरू २९
पतः॥शंभोःसख्युःश्रियःपत्कहीयतेस्मनसंपदा॥१७१॥श्रीः॥ मधोःसख्युश्चकामस्यसदृक्राजाशशांकः
सख्युर्धनदात्श्रियःपत्कनारायणात्॥शिष्टंस्पष्टं॥सख्यापत्यासख्यपत्येसख्युःपत्यःइत्यत्रननाडिन्दे

दितिनमादेशोकारो॥श्रीः॥ अस्यापायचतुरस्रन्येबुध्येधन्वेनुसाधवे॥शुचयेकीर्तिदुग्धायेस्पृहयामासवासवः
॥१७२॥श्रीः॥ अस्यराज्ञोबुध्येधन्वेकामधनवेइववासवःस्पृहयामासकामधेनुरिवेतद्बुद्धिर्ममापिभूयादिति
ऐछदित्यर्थःयतःसाधवेमनोज्ञायेकुतःसाधुत्वमित्याह॥यतःउपायाःसामदानभेददंडाएवचत्वारःस्तनाय
स्यास्तस्येतथाकीर्तिरेवश्वेतत्वाप्यायकत्वादिनादुग्धंयस्यास्तस्येबुध्याह्रियथोचितंनियुज्यमानाउपायाःस्व
फलसाधकत्वाद्यशोदुग्धंस्रवंतितथाशुचयेपवित्रायेश्रीः॥ तस्याःकीर्त्यामतेस्तस्या अस्मिन्विश्वोपरि
स्थिते॥सजिष्णोरपिदेत्याजिभीरोर्भीतिर्ययौदिवः॥१७३॥श्रीः॥ तस्याःकीर्त्याःतस्यामतेःगम्ययइत्यादिनाअ
त्रपंचमीतांशौर्यादिगुणोद्भवांकीर्तितांपूर्ववर्णितांमतिंचप्राप्यविश्वोपरिस्थितेविश्वत्रयोपरिवर्तिनिसर्वोत्त
मेइत्यर्थःअस्मिन्राज्ञिसतिदिवस्वर्गाद्भीतिर्ययौकीदृश्याःसजिष्णोरपिजिष्णुनाशक्रेणशत्रुनासहिताया
अपिदेत्याजिभीरोःदानवरणाद्भीरोःएतेनसर्वोत्कृष्टैःशौर्यादिगुणैर्बुध्याचशक्राज्ञयादेत्याअपिअनेनजि
ताइत्यर्थः॥श्रीः॥ असिधेनोःकामधन्वाजयास्यांसमितोग्रहात्॥नृपपंक्त्यामहाबुद्धेरपिक्षोभमसोढ्य
धात्॥१७४॥श्रीः॥ असौराजासमितोरणेभसिधेनोःखड्गयष्टेर्ग्रहात्महतीअतिशयिताबुद्धिःसंध्यादीनां
यथोचितेनव्यापारणगोचरामतिर्यस्यास्तस्याअपिनृपपंक्त्याःक्षोभंसंत्रासंव्यधात्॥ननुयद्यमुनाअसिधे
नुर्गृहीतानकिंनृपपंक्तिर्महाबुद्धिरपिक्षुब्ध्येत्याहयतोजयास्यांविजयप्रापणेकामधेन्वाअवश्यमेवविजयदाया
इत्यर्थःअथचयस्यजयास्यांजयलाभविषयेकामधेन्वाग्रहोअनुग्रहःप्रसादस्यात्सतस्मात्प्रसादात्समितो
सभायांमहाबुद्धेरपिमहाविद्वषापिक्षोभंकरोति॥श्रीः॥ लंबश्रुतेःस्निग्धदृष्टेरस्यातन्वांतनौस्फराः जाता
श्चर्यादिवःपृथ्व्यांपृथ्व्यादिविचतेययुः॥१७५॥श्रीः॥ तेनरूपवत्तेनसर्वत्रप्रसिद्धाःस्फराःदेवाःदिवःस्वर्गात्पृ
थ्व्यांययुःपृथ्व्याश्चदिवियययुःयतोलंबश्रुतेःस्कंधविश्रांतकर्णस्यस्निग्धदृष्टेःअरूक्षेक्षणस्यउपलक्षणत्वात्सु
रूपसश्रीकसर्वावयवस्यअस्यराज्ञोअतन्वांविस्तीर्णायांसमचतुरस्रसंस्थानायामित्यर्थःतनोर्देहविषये
जाताश्चर्याश्चअत्यद्भुतरूपसश्रीकत्वादेतन्मूर्तिदर्शनायदेवाअपिगतागतंचक्रुरित्यर्थः॥श्रीः॥ पृथ्व्याव

ध्वाः करं गृह्णलक्ष्म्येवध्वायय॑स्करवः॥लुब्धोन्यकीर्तिव धूंचपरवध्वाःपराङ्मुपि॥१७५॥श्रीः॥ स्कगमोनवरं
॥योवध्वंतस्यकरंगृह्णात्स्कहंकरोतिसपूर्ववध्वाःङुःखायेवस्याद्योपिपरवध्वाःपराङ्मुखस्यात्सोन्यवधूंने
ङतीतिविरोधःतङ्गंस्त्वेवंपृथ्व्यावध्वाःकरंराजग्राह्यं भागंगृह्णन्सन्लक्ष्म्येवध्वेस्करवःस्करकारीअभूत्तल
क्ष्म्यावधकत्वात्॥तथापरवध्वाःपराङ्मुखोअन्यकीर्तिवध्वांइतरकीर्तिकांतायांलुब्धश्चाभूत्अपिगृह्णन्नित्यत्रा
पियोज्यः॥श्रीः॥ ग्रामण्यपिरखलंधेनुनिस्पृहोसोपरस्त्रियेस्कलक्ष्म्येचस्कवधेचनस्मकस्मैचिदीर्ष्यति॥१७६॥
श्रीः॥ असोराजाशोभनाअनुच्छिन्नात्सधानालक्ष्म्योधनधान्यादिसंपदोयस्यतस्मैस्कलक्ष्म्येचतयाशोभनारू
पलावण्याद्यन्वितावधूर्भार्यायस्य॥केचिदुङि·त्यदितांङू·इंतानामेवकचमिछंतितन्मतेअत्रकजभावस्तस्मैस्क
वधेचकस्मैचित्कस्मैअप्येकस्मैनईर्ष्यतिनअसूयतिअसहमानोरमयतामामपिपरस्यलक्ष्मींवधूंचनगृह्णा
तीत्यर्थः यतोग्रामंनयतिग्रामणीःग्रामपतिःमहर्धिकइत्यर्थःतस्मैग्रामण्यपिरखलंपुनातियस्तस्मैरखलधेनु
दासायेवदरिद्रायेवेत्यर्थःस्पृहयालुर्यआधनेछयादरिद्रंनकोपीछतितथाअयमीश्वरमपीत्यर्थःतथापरस्त्रि
यैअन्यभार्यायैग्रामण्यपिरूपलावण्यादिभिरुत्कृष्टायेअपिरखलधेवत्कर्मकर्यैइवअस्पृहयालुरनभिलाषुकः
॥बुध्यैभुचयेकीर्त्याःमतेःनृपपंक्त्याःमहाबुङुःजयास्यांसमितोधन्येसाधवोभागःनिष्णोःकामधेन्वाः असिधे
नोः अतन्वांतनावित्यत्रस्त्रियाडितामित्यादिनातत्संबंधिनामन्यसंबंधिनांवाडितांदेदादोदोमः अन्येचपु
रुषस्यसमासार्थत्वेसतिनेछंतितन्मतेलंबश्रुतेरस्त्येवस्यात्ननुलंबश्रुत्याइतिअन्यस्त्वपुरुषस्यैवसमा
सार्थत्वेइछतिनस्त्रियाःतन्मतेस्निग्धदृष्ट्याअस्त्यत्रैवस्यात्॥ननुस्निग्धदृष्टेःस्त्रियाइति॥इङुतइत्येव॥
दिवः॥लक्ष्म्येपृथ्व्याःपृथ्व्यांवध्वेपरवध्वाःवधाःवध्वांस्कलक्ष्म्येस्कवधेकस्मैचिदित्यत्रस्त्रीङ·तइतितत्संबं
धिनामन्यसंबंधिनांवाडितांदेदास्दोस्दामः स्त्रियाइत्यनुवर्तमानेपुनस्त्रीग्रहणंनित्यस्त्रीविषयार्थंतेनेह ३०
नभवतिग्रामण्येखलधेपरस्त्रियेऽइङुतइतिकिं॥दिवःदिवि॥श्रीः॥ भुविश्रियेधियेवासौहियास्थानंभियापदं॥द्युभुवाआपतत्स्त्रीणांललासैषभ्रुवोभ्रुवो॥१७८॥श्रीः॥ दिवोभूर्द्युभूस्तस्माद्युभुवाः स्वर्गभूमेःसकाशा

ङुविमर्त्यलोकेआपतत्स्त्रीणामेतदद्भुतरूपादिगुणश्रीदिदृक्षयाआगच्छद्देवांगनानांभुवःसकाशाङुवामपर
स्यांभुविएषराजाललासचिक्रीङअत्रभ्रूशब्देनतन्निकटंचक्षुरुपलक्ष्यतेएकस्माच्चक्षुषोअपरस्मिन्नचक्षु
षिललासस्वर्वाभिरपिदेवीभिरहमहमिकयाअसौदृष्टइत्यर्थःयतःश्रियेरूपादिलक्ष्म्येधियेबुङुयेचवासस्याद
र्थेचतुर्थीयंश्रियोबुङुश्रगृहमित्यर्थःतथाह्रियोलज्जायाःस्थानंएतेनकुलीनत्वोक्तिःतथाभियोअपदमस्थान
मेतेनशूरत्वोक्तिः॥श्रीः॥ यवक्रियेस्यारिस्त्रियेभिल्लानद्यांकटभ्रुवे॥अत्रध्येकूपवर्षाभ्वायिवाधावंतनिष्कृपं॥५१॥
श्रीः॥ अस्यराज्ञोअरिस्त्रियेशत्रुभार्यायैनिष्कृपंनिर्दयंयथास्यादेवंभिल्लाःसदाअधावंतग्रहणार्थंधाविताःकी
दृश्येयवादिकदन्नत्वात्समर्थनरालभ्यतेइतियवानेवक्रीणातियात्स्येअतिनिस्नायेइत्यर्थःतथामूलराजेनपत्यौ
हतेभयेनारण्येपलायमानत्वान्नद्यांनदीमध्येनावाद्यसंपत्याकट्टेनेववीरणादितृणमयेनप्लवंतेतरंतियात्स्ये
तथाप्लवकर्षणध्यायतिप्रधीःनतथायातस्येअत्रध्येहादेवकथंभविष्यामीत्यार्तध्यानूपरायेइत्यर्थःतथाकूपव
र्षाभ्वेइवयथाकूपमंडूकीकूपादन्यंनकिंचिज्जानातितथाराज्ञीत्वात्स्वभवनदन्यन्मार्गोमार्गादिकमजानंस्वइत्य
र्थःकूपमंडूक्यायापिभिल्लानिष्कृपंमारणायधावंतिभिल्लाहिदर्दुरानपिमारयंति॥श्रियेधियेद्युभुवाःभ्रुवःङि
माःभियःभुवांभुवीत्यत्रवेयुवोस्त्रियाइतिवादेदास्दामः॥ईयुवइतिकिं अत्रध्येवर्षाभ्वेपूर्वेणनित्यंसवअ
स्त्रियाइतिकिंअरिस्त्रियेस्त्रीङइत्येवयवक्रियेकटभ्रुवेअरिस्त्रिये॥श्रीः॥ असौनिरुपमश्रीणांनानारूप
श्रियामिव॥स्त्रीणांनतभ्रुवांभ्रूणांरंगाचार्यकमाचरत्॥१७९॥श्रीः॥ नतभ्रुवांनम्रभ्रूणांस्त्रीणांसंबंधिनी
नांभ्रूणामसौराजारंगाचार्यकंनटोपाध्यायत्वमाचरत्चक्रेएतंसौदर्यतर्जितस्मरंदृष्ट्वानारीणामभिलाषाति
शयेनमुङ्कमुङ्कभ्रुवउल्लसंति॥ततोयथारंगाचार्योनायिकाःनर्तयतितथाअयंलीलावतीनांभ्रुवोनर्तित
वानित्यर्थःकीदृशीनांनिरुपमासर्वोत्तमाश्रीःसौंदर्यादिलक्ष्मीर्यासांतासामतएव नानारूपश्रियामिव
एवंज्ञायतनेताःस्त्रियःकिंतर्हिअनेकमूर्तयालक्ष्मीदेवताःतासां॥श्रीणांश्रियांभ्रूणांभ्रुवामित्यत्रआमो
नास्वेतिवानामूअस्त्रियाइत्येवस्त्रीणां॥श्रीः॥ याचकानामहतीनामाशानामेषपूरकः ग्रामण्यासोमपानि

स्येनद्वधूनांचपूजकः॥१८१॥श्रीः॥ याचकानांद्विजानांसंबंधिनीनांमहतीनांराज्यादिलाभविषयत्वाद्बृहतीना
माशानांमनोरथानांपूरकोभूत्तथाग्रामण्यांव्रतनियमादिभिःसोमपांवल्लीरसपायिनांयायज्ञकभेदानांत
द्वधूनांचसोमपाभार्याणांचनित्यंपूजकोभूत्॥याचकानांआशानांमहतीनांवधूनामित्यत्रङस्यापश्चेतिनाम
॥ङस्यापश्चेतिकिंग्रामण्यां॥श्रीः॥धामाष्टानांधीगुणानांषण्णांजेतांतरद्विषां॥गुणानामतिपङ्क्तिंभूश्चतुर्णांछंद
सामसौ॥१८२॥श्रीः॥ असौराजाषण्णांक्रोधमानमदस्मरलोभमोहानामंतरद्विषांजेताभूत्अतएवअष्टानां
श्रुश्रूषाश्रवणग्रहणधारणऊहअपोहअर्थविज्ञानतत्त्वज्ञानानांधीगुणानांधामस्थानमभूत्अतएवचपंचा
तिक्रांतायेतेषामतिषङ्क्तिंषण्णांसंधिविग्रहयानासनद्वैधीभावसंश्रयाणांगुणानांयथोचितंप्रवर्तनाद्उत्पत्ति
स्थानमभूत्तथाचतुर्णांमृक्सामयजुःसामाथर्वणानांछंदसांवेदानांचभूःस्थानंपाठेनअध्येत्रध्यापकसाहाय्य
करणादिनाचोत्पत्तिस्थानमभूत्निगृहीतांतरशत्रुर्हिस्फुस्थचित्त्वाद्बुद्धिपात्रंस्यात्धीमांश्चबुद्धिप्रकर्षेणसंध्या
दीन्सम्यङ्निर्युक्तेशास्त्रपाठादिकरोति॥चतुर्णांषण्णामित्यत्रसंख्यानाणोमितिनामु॥तत्संबंधिविज्ञाना
दिहनस्यात्अतिपङ्क्तिंसंख्यानामितिकिंद्विषांबङ्कवचनंव्याप्त्यर्थंतेनभूतपूर्वनांतायामपिअष्टानांएतेनैवनां
तसंख्यायामूलोदाहरणमपिसूचितं॥श्रीः॥ अतित्रयाणांवर्णानामतित्रीणामुदन्वतां॥प्रभुरेषत्रयाणांचपु
मर्थानांप्रवर्तकः॥१८३॥श्रीः॥ एषराजात्रयाणांपुमर्थानांप्रवर्तकस्त्रीन्धर्मार्थकामानुयथोचितंप्रयुंजानःसन्
प्रभुरभूत्केषांअतित्रयाणांत्रीनतिक्रांतानांचतुर्णांवर्णानांब्राह्मणक्षत्रियवैश्यशूद्राणांन्यायेनपालनान्न
थात्रयाणांपुमर्थानांसमुच्चयार्थोभिन्नक्रमेअतित्रीणांचतुर्णामुदन्वतांचपूर्वपश्चिमदक्षिणोत्तराधीनांच
चतुर्दिग्विजयात्॥त्रयाणामित्यत्रत्रयेस्त्रयइतिनामुत्रे स्त्रयादेशश्चतत्संबंधिविज्ञानादिहनस्यात्अति
त्रीणांअतत्संबंधिनस्यादित्येतेअतित्रयाणां॥श्रीः॥ मुनेःसाधोश्चसत्कर्तामदंहर्तांकलेरिपोः॥अङ्गतेरषवि
भवेद्योविशेषंचकारगोः॥१८४॥श्रीः॥ एषराजाअङ्गतेराश्चर्यकारिभिर्विभवैःसदाप्रवर्तमानोमहोत्सवादिल
क्ष्मीभिःकृत्वाद्योःस्वर्गात्सकाशाद्भूमेर्विशेषमतिशयंचकारननुकलोप्रतिक्षणंपदार्थानांह्रीयमानत्वात्कुतोअ

द्भुतविभवसंभवइत्याहरिपोःशत्रुभूतात्कलेःकलिकालात्सकाशान्मदंसांप्रतमनीतिरूपामदाज्ञैवसर्वत्रअस्व
लितेत्येवंगर्वंहर्तायतोमुनेर्निःसंगस्यसाधोश्चशिष्टजनस्यसत्कर्तारक्षादानादिनासंमानकःयथायथासोमुनी
नूसाधुंश्चसच्चक्रेतथाकलिःक्षीणस्तताश्चमहध्र्याभूःस्वर्गादपिविशिष्टाभूदित्यर्थः॥कलेःमुनेःरिपोःसाधोःद्योःगोरि
त्यत्रएदोझामित्यादिनाडसिडसोरेफः॥श्रीः॥ पत्कर्जयश्रियःपत्कःसख्युःसख्युर्विडौजसः॥एनोऽन्युरुमाभवु
र्नेतुरस्माद्भूनयः॥१८५॥श्रीः॥ अस्मान्नृपालनयोन्यायोअभूत्यतःपतिमिछतिक्यनिदीर्घत्वेपतयतिक्विपियङ्
पेचपतीस्तस्याःपत्कःस्वामिनमिछंत्याःजयश्रियःपत्कःशत्रुच्छेदननायकात्एतेनसैन्यकोशाद्युत्कृष्टसंपदा
महर्धिकत्वमुक्तंतथाएनोऽन्युःपूर्ववत्किनिक्विपिएनोऽन्युर्निंपापच्छेदमिच्छतोअतएवसख्युःसखायमिछतोवि
डौजसइंद्रस्यसख्युःयागादिधर्मानुष्ठानविधानेनाङ्गादकत्वान्निवृत्तयाउमाभर्तुर्हरस्यनंतुर्नमस्कर्तुःएते
नविशेषणत्रयेणअतिधार्मिकत्वमुक्तं॥महर्धिकोधार्मिकश्चन्यायमेवकरोति॥खिसख्युरस्मात्तिपत्कःस्मात्
खीतीसख्युर्विडौजसःपत्कर्जयश्रियइत्यत्रखितिरखीतियउरितिडसिडसिरूर॥ऽन्युरित्यत्रक्रादेशोषीतिनस्यास
त्वान्निरूपत्वेउरनंतुरस्मात्भर्तुरित्यत्रऋतोङुरङुर॥श्रीः॥ स्फुधास्वसारंवोदारमतिनसारमुष्णगोः॥अमुंभूपंप्रशा
स्तारंलब्ध्वामुमुदिरेप्रजाः॥१८६॥श्रीः॥ अमुंभूपंप्रशास्तारंराजाधिराजंलब्ध्वाप्रजाःमुमुदिरे यतःस्फुधायाःस्व
साभगिनीलक्ष्मीःद्वयोरप्येकस्मिन्लब्धावुत्सन्नत्वात्वोदारमिववोदारंसम्यक्प्रजापालनादिनाविष्णुतुल्यमतए
वउष्णगोरवेनसारंपोत्रमतिक्रांतंसूर्यस्यपुत्रोमनुस्तस्यपुत्रइक्ष्वाकुःसूर्यस्यपोत्रस्तस्मादपिनीतिप्रजापाल
नादिनाअधिकमित्यर्थःअथचातिनसारमतिशयितंपोत्रंलब्ध्वाप्रकृष्टपोत्रजन्मनिप्रजालोकामोदंते॥श्रीः॥ शं
भोःक्षत्तारमाज्ञायांत्वष्टारमिवकोशले॥अमुंहोतारःपोतारंनेष्टारंरुक्रतुंक्रतौ॥१८७॥श्रीः॥ होतारःपोतारंने
ष्टारंऋत्विग्विशेषाःक्रतौयज्ञेअमुंनृपंतुष्टुवुःयतःशंभोर्हरस्यआज्ञायांविषयेक्षत्तारंप्रतीहारमिवयथाशंभोरा
ज्ञांनंदीप्रतीहारःकरोतितथाशंभूक्तयज्ञादिविधिरूपाज्ञयोःकारकमित्यर्थःतथाकोशलेयागादिविधिविषयेनेषु
णेत्वष्टारमिवयथात्वष्टावर्धकिःशिल्पक्रियाकुशलस्यात्तथायागादिधर्मक्रियायांकुशलमित्यर्थःएवंचास्ययागा

दिविषयंक्रियाज्ञानंतथाचोक्तं॥ श्रीः॥ पितरःसंतुसंतुष्टादेवाश्वत्वयियष्टरि॥ चंडिकामातनंदेतिप्रस्तोतारोब्रुवन्निमं॥८८॥ श्रीः॥ प्रस्तोतारःऋत्विग्विशेषाःइमंनृपमब्रुवन्कथमित्याहचंडिकाचंडालदेवीनाम्नीमातायस्ययद्वा चंडिकागौरीप्रतिपालिकत्वान्मातायस्यतस्यसंबोधनंहेचंडिकामातस्त्वयिविषयेपितरः पूर्वजादेवाश्वसंतुष्टाःसंतुयतोयष्टरियागैःपितृदेवानांपूजकेनतश्चनंदेति॥ वोढारंस्वसारंनमारंनेष्टारंत्वष्टारंक्षत्तारंहोतारंपोतारंप्रशास्तारमित्यत्रतृस्वस्रित्यादिनाऽरतृशब्दस्यार्थवतोग्रहणेनप्रत्ययग्रहणान्नाऽरादीनामव्युत्पन्नानांसंज्ञाशब्दानांनृशब्दस्यग्रहणंनस्यादितेषांपृथगुपादानं॥ इदमेवज्ञापकमर्थवद्ग्रहणेनानर्थकस्यग्रहणंभवतीतिव्युत्पन्नियहपक्षेत्यग्रहणेनैवसिद्धेनाऽरादिग्रहणंनियमार्थंतेनान्येषामोणादिकानांनस्यात्पितरः॥ केचित्तुप्रस्तोतृनेतृउद्गातृप्रतिहर्तृप्रतिभ्रातृशब्दामोणादिकानामप्यारंमन्यंतेप्रस्तोतारः पितरः॥ यष्टरीत्यत्रऋडोवित्यरचंडिकामातेत्यत्रमातुर्मातइत्यादिनामातइत्यकारांतादेशः॥ श्रीः॥ मातःक्षितेबहेलक्ष्मिशंभोतद्वधुचंडिके॥ अंबाडेगोत्रदेविकस्थेत्यस्यप्रालपन्द्विषः॥१८९॥ श्रीः॥ स्पष्टोनवरं॥ तद्वधुहरप्रियेअंबाडेमातःइतिप्रालपन्एतेनरणेपतिताद्विषःक्षित्यादिदेवताःस्मरंतएवमरुदन्नित्यर्थः॥ श्रीः॥ भद्राग्रणीःसतांमित्ररूपेणपरमेनृप॥ त्वयाश्रीमन्धृतोर्वीत्यूचेमंसप्रेयसीजनः॥१९०॥ श्रीः॥ स्फुटमः किंतु॥ परमश्चासौइश्चपरमेःतस्यसंबोधनंहेपरमेरूपेणकृत्वाप्रकृष्टकामतयासहप्रेयसीभिर्वर्ततेयःसःसप्रेयसीसभार्योलोकः॥ मातःक्षितेशंभोइत्यत्रऽस्यगुणइतिगुणःऽस्यस्येतिकिंलक्ष्मितद्वधुचंडिकेइत्यत्रपदात्पइत्येतन्नित्यदित॥ देविलक्ष्मितद्वधुद्विस्वरांबार्थअंबेत्यत्रनित्यदिदितिकिंभद्राग्रणीःअंबार्थानांद्विस्वरविशेषणंकिंअंबाडेआपइत्येवमातःनृपमित्रपरमइत्यत्रआदेतइत्यादिनासेरुत्वादेशस्यामश्चत्वगुउर्वीसप्रेयसीधृताश्रीमन्नित्यत्रदीर्घाभ्यापीत्यादिनासेर्लुक्एभ्यइतिकिंजनःअमुमित्यत्रसमांनादमोतइतिअतोभलुक्॥ श्रीः॥ चतुर्णांछंदसांषण्णामंगानामेषवेदिता॥ विद्यानांचचतसृणांशक्तीनांतिसृणांगृहं॥१९१॥ श्रीः॥ एषराजाचतुर्णांछंदसांवेदानांतथाषण्णामंगानांशिक्षाकल्पव्याकरणछंदोज्योतिर्निरुक्तानांचवेदिताअर्थतोज्ञाताभूत्तथाचतसृणांविद्यानाआन्वीक्षिकीत्रयीवार्तादंडनीतीनांगृहंतत्त्वत्स्तुत्यकसंग्रहादिनाआधारोऽभूत्तथातच्छास्त्रोक्तानुसारेणप्रवृत्यातिसृणांशक्तीनांप्रभुत्वशक्तिउत्साहशक्तिमंत्रशक्तीनांगृहंस्थानमभूत्एतेनसर्वशास्त्राणिज्ञातानिसंगृहीतानितदुक्ताचरणाच्चफलप्राप्त्याअस्यतानिसफलान्यभूवन्नित्यर्थः॥ अंगानांशक्तीनांइत्यत्रदीर्घोनामित्यादिनादीर्घःअतिसृचतसृषइतिकिंतिसृणांचतसृणांषण्णांचतुर्णानामितिकिंछंदसां॥ श्रीः॥ नृणामीशोत्रारिर्नृणांशक्तीःप्राणांश्चहर्तरि॥ नकोपिचतुरन्त्याजोव्यङ्के व्यहनिवापतत्॥१९२॥ श्रीः॥ अत्रास्मिन्नृणामीशेनृपेअरिर्नृणांशक्तीःप्रभुत्वोत्साहमंत्ररूपबलानिचप्राणांश्चहर्तरिअपनयनशीलेसतिआजोरणेकोपिशत्रुर्नअपतत्नडुदोकेकीदृश्याजोचतुर्षुअहस्सुभवइतिविगृह्यतवेइत्यण्विषयेसर्वाशइत्यादिनाअट्भद्रादेशश्चतसिद्धिर्गोरनपत्यइत्यादिनाअणोलुपिचतुरङ्कःतस्मिंश्चतुरङ्गिण्यंत्यङ्कव्यहनिवाशोककालीनेपीत्यर्थःआजेःप्रयोगःपुंस्यपिदृश्यतेतथाचमाघे॥ वाहनाजनिमानासेसाराजावनमानतइति॥ श्रीः॥ असायाङ्गेपिसायाङ्गीवेषोस्वाप्सीन्नजातुचित्॥ अदीप्यतप्रतापेनसायाहनिकृताशवत्॥१९३॥ श्रीः॥ यथासायाङ्गिसंध्याकालेनिषिद्धत्वान्नकोपिस्वपितितथैषराजाअसायाङ्गेपिअसंध्यायामपिस्वापादिकालेपीत्यर्थःजातुचित्कदाचिदपिनास्वाप्सीत्सदापिप्रजापालनेजागरूकोभूदित्यर्थः।तथायथासायाहनिकृताशोअग्निःप्रतापेनदीप्यारूत्वादीप्यतेतथैवप्रतापेनतेजसारूत्वादीप्यते॥ श्रीः॥ पैत्र्यव्यङ्गिदेवतेपिव्यङ्गब्राह्म्येव्यहन्यपि॥ गुणानांवर्ण्यमानानांकोप्यंतंनास्यलब्धवान्॥१९४॥ श्रीः॥ स्फुटमः किंतु॥ पितॄणामयंपैत्र्यस्तस्मिन्विगतमहोव्यङ्गस्तस्मिन्व्यङ्गिगतदिनंदेवतंदेवसंबंधिनिब्राह्मेविधातृसंबंधिनिपैत्र्यव्यङ्गादिप्रमाणंचेदं॥ भवेत्पैत्र्यंत्वहोरात्रंमासेनाब्देनदैवतं॥ देवेयुगसहस्रंतद्ब्राह्ममिति॥ एतद्गुणानांवर्ण्यमानानांपैत्र्यंदैवतब्राह्मादिनान्यप्यतिक्रामंतिनतुतेपूर्यंतेइत्यर्थः॥ नृणांनृणामित्यत्रनुर्वेतिवादीर्घःप्राणानित्यत्रशसोतोत्यादिनाशसोअतासहदीर्घःपुंसिशासःसस्यनश्चपुल्लिंगाभावेतुदीर्घत्वमेवशक्तिःचतुरङ्गिव्यहनिसायाहनिसायाङ्गिव्यङ्गिव्यहनीत्यत्रसंख्यासायंवेत्यादिनाअङ्गस्याहनादेशोवाअहनादेशश्चईडोवेतिवाअनोस्यलुग्वापक्षेत्यङ्गेअसायाङ्गेव्यङ्गे॥ श्रीः॥ अष्टाभ्योदिग्गजेभ्यश्चाष्टभ्योद्विभ्यश्चधूर्नियां॥ अस्यष्टानोचनिधयोत्यष्टश्चाभिमुखा

ग्रहाः॥१९५॥श्रीः॥ अत्रनृपे विषयेअष्टावतिक्रांता अत्यष्टानोनवमहापद्मपद्मशंखमकरकछपमुकुंदकुंदनील
चर्चारव्यानिधयःतथा अत्यष्टाःनवअर्कसोममंगलबुधगुरुभृक्रशनैश्चरराहुकेतवोग्रहा अभिमुखाः अनुकूलाः
अभवन्यतःकिंभूतेअष्टाभ्यएरावतपुंडरीकवामनकुमुदअंजनपुष्पदंतसार्वभौमसुप्रतीकेभ्योदिग्गजेभ्यश्च
तथाअष्टभ्योविंध्यपारिजातशुक्तिमत्ऋक्षपर्वतमहेंद्रसह्यमलयहिमवद्भ्योऽद्रिभ्यश्चकुलाचलेभ्यश्चसका
शात्सम्यक्पालनायभूभारस्यात्मनिनिक्षेपाद्धुरं भूभारंनयत्यात्मानंप्रापयतियस्तस्मिन्धूर्नियांसकलभूभार
धरेइत्यर्थः अष्टभिर्दिग्गजेःकुलाचलैश्चभूर्ध्रियतइतिकविरूढिः अथचयोधुर्नीःकार्यप्राग्भारकरणक्षमस्या
त्तस्मिन्सर्वोप्यनुकूलस्यादिति॥ नियामित्यत्रनियआमित्यामअष्टाभ्यःअष्टभ्यःअत्यष्टाःअत्यष्टानइत्यत्रवा
ष्टनआःस्यादावितिथाआकारः॥श्रीः॥ अष्टावष्टतथात्यष्टावस्यभावान्नविजानतः॥ कीर्त्यात्यष्टोकृताःक्ष्मांशादि
शोष्टाष्टोनगाःसिताः॥१९६॥श्रीः॥ अस्यराज्ञःकीर्त्यासिताःश्वेताःकृताःकेइत्याहअष्टावतिक्रांताअत्यष्टानव
इंद्रद्वीपकशेरुमत्ताम्रपर्णगभस्तिमान्नागद्वीपसोम्यगंधर्ववरुणकुमारीद्वीपाख्याःक्ष्मांशाःपृथ्वीखंडानितथा
अष्टोऐंद्रीआग्नेयीयाम्यानैरृतिवारुणीवायव्याकौबेरीऐशान्योदिशस्तथा अष्टोनगाःकुलाचलाःयतोअष्टोतथा
अष्टतथाअत्यष्टोनवसर्वसंख्ययापंचविंशतिभावांस्तत्वानिविजानतोवेदितुःसांख्यमतेहिपंचविंशतिःपदार्थाः
वर्ण्यंते॥तथाहि॥सत्वरजस्तमसांसाम्यावस्थाप्रकृतिःतद्वद्भूतंमहत्तत्वंततस्माद्दंकारःतस्माच्चस्पर्शनरसन
घ्राणचक्षुःश्रोत्रनामानिपंचबुद्धींद्रियाणिपायुउपस्थवचःपाणिपादाख्यानिपंचकर्मेंद्रियाणितथामनःतथा
रूपरसगंधस्पर्शशब्दसंज्ञानिपंचतन्मात्राणिइतिषोडशकोगुणःतन्मात्रोद्भूतानितेजोजलपृथ्वीनभोवायु
संज्ञानिपंचभूतानिअकर्तोविगुणोभोक्ताचात्मेतिसांख्यमतेपंचविंशतितत्वव्यतिरिक्तमन्यज्जगन्नास्तित
त्वसकलजगत्स्वरूपज्ञस्येत्यर्थःएवंविधस्यचकीर्तिःसर्वत्रापिप्रसरति॥ अष्टोनगाःअष्टोभावानित्यत्रअष्ट
ओजसोसोरितिओःकृत्वस्यनिर्देश्यादिहनस्यात् अष्टदिशःअष्टभावान्नअतत्संबंधिनोरपीच्छंत्येकेअत्यष्टो
क्ष्मांशाःअत्यष्टोभावान्॥श्रीः॥ चातुर्षडष्टभुवनान्युचितेतनीहस्थामान्यधुर्यतिहराःकिलपंचषट्च॥ तूर्णेभृशंज

यत्कृतेदधतोस्यचास्तांमन्येहयहिपबलेपरिवारमात्रं॥१९७॥श्रीः॥ किलेतिसंभावनायांपंचषट्चहराःएकादशरु
द्राःयतियावंतिस्थामान्यभवंस्तितावंतिबलानीहराज्ञिअधुःस्वकीयानिसर्वाण्यपिबलानिअस्मिन्स्थापितवंत
इत्यर्थःयतःषडष्टभुवनानिभूर्लोकभुवोलोकस्वर्लोकमहर्लोकजनलोकतपोलोकसत्यलोकारव्यानिसप्तसप्तभिर्वा
युस्कंधैर्मिलितानिचतुर्दशजगंतित्रातुंरक्षितुमुचितंरक्षितुंक्षमंहिसर्वोपिस्वबलंनिदधातिअतएवतथाहंमन्ये
अस्यराज्ञोजयकृतेविजयार्थंतूर्णंदूर्णीरोउपलक्षणत्वाद्नुश्चभृशमत्यर्थंदधतःसतहयहिपबलेअश्वगजसैन्ये
उपलक्षणत्वाद्रथपत्तिबलेअपिपरिवारमात्रंपरिछदएवआस्तामभूतास्वबलेनैवास्यजगच्छासितुंक्षमत्वात्॥य
तिअभवन्ततिन्यधुःषट्पंचहराःषडष्टत्रातुमित्यत्रउतिष्णोत्यादिनाजत्रासोर्लुक्श्यामानिभुवनानीत्यत्रनपुंश
सिरितिजसशसोःशिःनपुंसकस्येतिकिंहराःबलेआस्तां॥तूर्णंदधतइत्यत्रउर्गतिर्द्रुःपरिवारमात्रंभृशंदधतइत्यत्र
अतःस्यगोमितिस्यमोरमु॥वसंततिलकंछंदः॥ सर्गोनछंदोंतरंक्रियतइतिकविसमयः॥श्रीः॥ अन्यद्बलंकि
लमहोन्यतरद्वीद्वोधैर्यंचनेतरदतीतरमस्यसर्वं॥सैन्यंहिषांकतमदेषनसंजहारत्वद्दंजगत्कतरदेकतरंनचक्रे॥
॥१९८॥श्रीः॥ अस्यराज्ञोबलंपराक्रमःअन्यदपूर्वंलोकोत्तरमित्यर्थःतथाअस्यमहस्तेजोरवींद्वोःसूर्याचंद्रमसोर्मि
ध्येअन्यतरदेकतरंहिषांसंतापकत्वाद्वितेजोवासर्वंजनानामाह्लादकत्वादितेजोवेत्यर्थः॥तथाअस्यधैर्यंचित्ता
वष्टंभलक्षणंनइतरत्तानान्यादृशंआपद्यप्यविचलमित्यर्थःकिंबहुनाअस्यसर्वंसौंदर्यगांभीर्यादिअतीतरंइतरान
न्यानतिक्रांतंसर्वोत्कृष्टमित्यर्थःअतश्चैषराजाहिषांसैन्यंकतमन्मनसंजहारतथाकतरदेकतरंजगत्त्वद्दृष्टंनचक्रेकिं
तुसर्वमपि॥अन्यत्अन्यतरत्इतरत्कतरत्कतमदित्यत्रपंचतइत्यादिनास्यमोर्दः अनेकतरस्येतिकिंएकतरंअ
न्यादेरितिकिंसर्वेअन्यादिसंबंधिनोःस्यमोर्ग्रहणादिहनस्यात् अतीतरंमहःजगदित्यत्रानतोलुवितिस्यमोर्लुप्
अन्यतइतिकिं॥धैर्यसैन्यं॥श्रीः॥ मजरसमजरःपरित्यजहिजरःसजरसंचसंगरे॥स्वादोकनुवारितिष्ठसीत्याक्रंद
स्तृषयास्यशात्रवं॥१९९॥श्रीः॥ हेस्वादोमिष्टवारिजलकनुइतिप्रश्नेकस्मिन्स्थानेत्वंतिष्ठसिआत्मानंदर्शयेत्यर्थःइ
त्येवंप्रकारेणअस्यराज्ञःशात्रवंशत्रुसमूहस्तृषयाहेतुनाआक्रंदत्अलपत्यतःकिंभूतंसंगररणेअजरोजरारहितं

तरुणंशात्रवंकर्तृसजरसंजरान्विनंदृढंकर्मपरित्यजन्तथासजरसंविद्यमानजरंदृढंशात्रवंकर्तृविजरस्तरुणंशात्र
वंकर्मपरित्यजन्अन्योन्याप्रतीक्षायाभयातिरकात्पलायमानमित्यर्थःपलायमानस्यहिगादायासेनतृषातिरेकःस्या
न्॥ अजरःसजरसंविजरःसजरसमित्यत्रजरसोवेतिवास्यमोर्लुक्स्वादोइत्यत्रनामिनोलुग्वेतिवालुग्पक्षेलुबवृद्ध
वारि॥ वेतालियंछंदः॥श्रीः॥ सक्थ्न्यायुःपथिरवेतृणारिपुनृपाअक्ष्णास्रमोकृत्रांतरंदध्नोस्थ्नश्चनजानतेस्मम धुनो
बूनांचपर्याकुलाः॥अश्वीयानिस्कवल्स्यवल्गिस्कमहांस्यत्यूर्ज्यनूर्जिक्षणातेषांदंतिकुलानिचालगभवन्नस्मिन्रणा
रंभिणि॥२००॥श्रीः॥ अस्मिन्नृपेरणारंभिणिसतिरिपुनृपाःसक्थ्नाईरुणाद्रेतुनाअयुर्जग्मुर्नेशुरित्यर्थःईदृशेनपथि
मार्गेरवेतृणारवेद्यमानेनश्रमान्वितेनएतेनेषांपूर्वंकदाचिदपिनरणेभंगइतिसूचितंयदिपूर्वंमपिरणेअतिभग्नास्त
स्तदाअभ्यासेनश्रमजयादेषांसक्थिनोखिद्यतेतथादध्नोअस्थ्नश्चमधुनोमाक्षिकस्यांबूनांवाअंतरंविशेषंनजान
तेस्मयतःअभूतपूर्वंपराभवात्त्यक्तास्त्रमोकृत्राबाष्पमोचनशीलेनअक्ष्णादृष्ट्याउपलक्षिताःरोदनजलाविलाक्षाइ
त्यर्थःतथापर्याकुलाःफायनोद्भ्रांताःयेपूर्वंरणेकदापिनभग्नानरुदितानचभीतास्तेष्वस्मिन्रणारंभिणिसतिभग्ना
रुदिताभीताश्चेत्यर्थःततश्चतेषांरिपुनृपाणांस्कमहांसिशोभनतेजःस्वीनिअतएवस्कशिक्षितत्वाच्चस्कष्टवल्गतिग
तिविशेषान्कुर्वंतिक्विपिस्कवल्ग्-अश्वीयानिअश्वसमूहाःप्रहारैर्जर्जरांगतयाअवल्गागतिविशेषरहितानिक्षणंशी
घ्रमलमत्यर्थमभवन्तथास्कमहांसिदंतिकुलानिगजोघाःअतिशयेनऊर्जयंतिक्विपिअत्यूर्ज्जिअतिबलिष्ठानिअनू
र्जिबलरहितान्यभवन्॥ अस्त्रमोकृत्राअक्ष्णारवेतृणासक्थ्नेत्यत्रवान्यतइत्यादिनावापुंस्त्वंदध्नःअस्थ्नःसक्थअस
इत्यत्रदध्यस्थीत्यादिनातस्यान्मधुनइत्यत्रानास्वरेनातइतिनोंतःअनामितिकिंअंबूनांअश्वीयानीत्यत्रस्वग
छावतिनोंतःस्कमहांसीत्यत्रधुटांप्रागिति नोनअत्यूर्ज्जिअत्यूर्जिस्कवल्ग्-अवल्गीत्यत्रलोवेतिवानोंतः॥शार्दूल
विक्रीडितंछंदः॥श्रीः॥ शात्रवीरेषुभवन्जगंतिचरुवान्वश्यानिदोष्मानसोयुग्बुध्यावलयुग्दृढांसस्कभगोनद्वानि
वैकःपुमान्गौर्द्यौर्गोमवतामुनानयमयःपंथात्रःभुक्षाःस्करवीगाविप्रानवितुंविपक्षजलधौमंथाश्चरवङ्गःकृतः॥२०१॥
॥श्रीः॥ इतिकोविदवृंदवंद्यैःश्रीहेमचंद्राचार्यैर्विरचितेव्याश्रयनामधेयेमहाकाव्येप्रथमःसर्गःसंपूर्णः॥श्रीः॥ ७॥

॥३५॥

असोराजाजगंतिर्ऊर्ध्वाधोमर्त्यलोकान्वश्यानिस्वायत्तानिचरुवांश्चक्रेकीदृशःअनड्वानिवदृषभइवदोबलिष्ठोस्थूलोचयावंसौ
स्कंधौताभ्यांस्कभगस्तथाशत्रुवधादिस्वकार्यकरणात्स्कर्मीणत्वात्प्रशस्योदोषोभुजावस्यस्तःप्रशंसायांमतोदोष्मान्अतएवस्थी
रेषुस्थूरेषुमध्येप्राड्प्रथमोमुख्यःएतैर्विशेषणैरुत्साहशक्त्यतिशयउक्तःतथाबुध्यायथोचित्योपायादिप्रयोगविषयथामत्या
युक्तयुक्तःएतेनमंत्रशक्तिरुक्तातथाबलयुक्तसैन्येनयुक्तःएतेनप्रभुत्वशक्तिरुक्ताअतएवचैकोऽसाधारणःपुमान्भवन्सं
पद्यमानःयथावश्यानिचरुवान्तथाहगोरित्यादि॥अमुनागाज्ञागांपृथ्वीमवतारक्षतासतापंथाःमार्गोनयःप्रकृतो
स्मिन्नयमयोन्यायप्रचुरःन्यायप्रधानोवाकृतःन्यायमार्गःप्रवर्तितइत्यर्थःअतएवअमुनागोःपृथ्वीद्योरिवस्वर्गतुल्याकृता
इवशब्दोज्ञेयःएतेनमर्त्यलोकस्यवश्यत्वमुक्तंतथागाःधेनूर्विप्रांश्चअवितुंदैत्येभ्योरक्षितुंविपक्षजलधौविपक्षशब्देनसा
मान्यतःशत्रुवाचकेनापिगोविप्रानवितुमितिविशेषणोक्तेर्दैत्याउच्यंते तएवहिगोविप्रांश्चघ्नंतिपतएवहिदुर्विगाह
त्वाज्जलधिःसमुद्रस्तत्रस्वङ्गःरूपाणांमंथाःमंथानकतुल्यःकृतःविपक्षाःस्वङ्गेनमथिताइत्यर्थःएतेनाधोलोकस्यवश्य
तोक्तायतोदैत्याःपातालोकसउच्यंतेअतएवामुनाऽरभुक्षाःइंद्रःस्करीकृतःएतेनऊर्ध्वलोकस्यवश्यतोक्ता॥ गोविप्रान
वितुंविपक्षजलधौमंथाश्चस्वङ्गःकृतइत्यनेनगोविप्ररक्षाविपक्षमथनलक्षणमस्यावदानमग्रेवर्णयिष्यंतइतिसू
चितं॥ ग्राड्त्यत्रअचइतिनांतःभवन्नुदितश्चक्रवान्दोष्मानित्यत्रऋइदितइतिनोंतःअडिन्नात्रयुजोरसमासइति
किंबलयुग्अनड्वानित्यत्रानडुहःसावितिनोंतःपुमानित्यत्रपुंसोःपुमान्भिति पुमन्सादेशः॥ गोःद्योरित्यत्रउतओइति
औगांगाइत्यत्रअस्यसोतेतिआः॥ पंथाःमंथाःऋभुक्षाःइत्यत्रपथिन्नित्यादिनाअतस्यआःएरित्यनेनइकारस्याप्यथो
न्नित्यनेनथस्यात्वादेशश्च॥श्रीः॥ इतिश्रीजिनेश्वरसूरिशिष्यलेशाभ्यर्थितलक्ष्मणगणिविरचितायांश्रीसिद्धहेम
चंद्राभिधानशब्दानुशासनद्व्याश्रयवृत्तौप्रथमःसर्गःसंपूर्णः॥ श्रीः॥ गुरुनिकरकृपेक्षायास्विच्छयावाक
मलनयनकांतांचिंतयानंतयावा॥ करणकलितकामाद्याधिनाव्याधिनावाकृरकृतगपराधंक्षंतुमर्हंतिसंतः॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

॥इतिद्याश्रयनाममहाकाव्यस्यप्रथमःसर्गः॥

34